1

अथमाघकाव्येद्वितीयसर्गप्रारंभः

श्रीगणेशायनमः अथास्मिन्सर्गे मंत्रवर्णनाय बीजमावपति यियक्षमाणेनेति अथेंद्रसंदेशश्रवणानंतरं यियक्षमाणेन यष्टुमि
च्छता यजेः सन्नंताल्लटः शानजादेशः पार्थेन पृथापुत्रेण युधिष्ठिरेण तस्येदमित्यण् अन्यथास्त्रीभ्यो ढक् स्यात् आहूतः आकारितः ह्वयतेः क
र्मणिक्तः संप्रसारणदीर्घौ तथा अभिचैद्यं शिशुपालं प्रति लक्षणेनाभिप्रती आभिमुख्य इत्यव्ययीभावः अभिरभागइति कर्मप्रवचनीयत्वे

यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरं अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः १

तद्योगे द्वितीया वा प्रतिष्ठासुः प्रस्थातुमिच्छुः तिष्ठतेः सन्नंतादुप्रत्ययः मुरं द्विषन्मुरारिः द्विषोमित्र इति शतृप्रत्ययः नलोक इत्यत्र द्विषः शतुर्वावचन
मिति वैकल्पिकः षष्ठीप्रतिषेधः कार्यद्वयेन मुरकार्यसुहृत्कार्यरूपेणाकुलो विप्रतिषेधादावश्यकत्वाच्च द्वयोः संदिहान आसीत् अतो मंत्रस्यायमवस १
रइतिभावः १

 आस्थानीसैववेदिः वेदिःपरिष्कृताभूमिरित्यमरः तस्यांव्यद्योतिष्टदीप्यतेस्म द्युद्भ्योलुङीतिपरस्मैपदाभावेपक्षेतङ् रूपकालंकारः ३ र
२ त्नेति रत्नानांस्तंभाः इतिषष्ठीसमासः विशेषेपर्यवसानान्नविकारार्थत्वं तेषुसंक्रांतप्रतिमाः संक्रांतप्रतिबिंबाः प्रतिमानंप्रतिबिंबंप्रतिमा
प्रतियातनेत्यमरः तेत्रयएकाकिनोऽसहायाअपि एकाद्याकिनिच्चासहाये इत्याकिनिच्प्रत्ययः परितोभितःसर्वतः पर्यभिभ्यांचेतितसिल्

रत्नस्तंभेषुसंक्रांतप्रतिमास्तेचकाशिरे एकाकिनोपिपरितःपौरुषेयवृताइव ४

प्रत्ययः सन्तंसर्वोभयार्थेवर्तमानाभ्याभिष्यतइत्युक्तंभाष्ये पौरुषेयेणप्रतिबिंबभूयस्त्वात् पुरुषसमूहेनवृताइवेत्युत्प्रेक्षा चकाशिरे पुरु
षाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यमितिठञ्प्रत्ययः एतेनविजनत्वंउक्तं यद्यपिनिःस्तंभेनिर्गवाक्षेचनिर्भित्यंतरसंश्रये प्रासादाग्रे
त्वरण्येवामंत्रयेज्ञावभावितमिति कामंदकः मंत्रभूमेःस्तंभप्राचुर्यनिषेधाद्दृश्यंत तथाऽपितस्यापिविजनोपलक्षणत्वाददोषइतिभावः २

एवं मंत्रबीजं संदेहमुपन्यस्य मंत्रोचितं देशमाह गुरुकाव्येति अथसंदेहानंतरं असौ हरिः अभिनभः आकाशं प्रति पूर्ववदव्ययीभावः कर्मप्र वचनीययुक्ते द्वितीया वा गुरुकाव्यौ गृहस्पतिशुक्रौ अनुगावनुयायिनौ यस्यां तां गीष्पतिर्धिषणो गुरुः शुक्रो दैत्यगुरुः काव्य इत्यमरः चंद्रस्य मां चांद्रीं श्रियं बिभ्रत् अत्र श्रीतुल्यां श्रियमिति निदर्शना भेदः उद्धवसीरिभ्यां सार्द्धं उद्धवबलरामाभ्यां सह सदः सभां आसदत् अगमत्

गुरुकाव्यानुगां बिभ्रच्चांद्रीमभिनभः श्रियं सार्द्धमुद्धवसीरिभ्यामथासावासदत्सदः १

आज्वल्यमाना जगतः शांतये समुपेयुषी व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी २

सदसः आसादत् आदिति भावः सदेर्लुङि पुषादित्वाच्च्लेरङादेशः अत्र मनुः गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः अरण्ये निःशलाके वा मंत्रयेदविभावित इति २ आज्वल्यमानेति जगतः शांतये निरुपद्रवाय समुपेयुषी मिलिता आज्वल्यमाना भृशं ज्वलंती धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ततो लटः शानजादेश... असौ नर... ...दे शे डिङ्गागमित्यादिना ङीप् सभा

माघ० टी० द्योतितेति कुंदंमाघभवः पुष्पविशेषः माघ्यंकुंदंरक्तकस्तुइत्यमरः तस्यकुञ्जलाग्राणीवदंतायस्यसः तस्यकुंदकुञ्जलाग्रदतः अग्रां सर्ग२
२ तस्तुदन्तस्तुभ्रवृषवराहेभ्यश्चेति अग्रांत पूर्वपदबहुव्रीहिःसमासांतोवैभाषिकोदत्रादेशः तस्यहरेः सरस्वती अंतःप्रधानासभा अंतःसभास

द्योतितांतःसभैःकुंदकुञ्जलाग्रदतःस्मितैः स्नपितेवाभवत्तस्यशुद्धवर्णासरस्वती ७

3

भाभ्यंतरमित्यर्थः साद्योतितापकाशितायैस्तैः स्मितैः स्नपितेवशाखिनेव स्नातेव्यंनानुक्तः अति्ङ्गीसार्दिनापुगागमः मितांद्धस्वः शु-
द्धवर्णास्फुटाक्षरास्वच्छकांतिश्चाभवत् स्वाभाविक्यावर्णशुद्ध्याःस्नानहेतुकत्वमुत्प्रेक्ष्यते स्मितपूर्वाभिभाषीहरिरितिभावः ७ ३

अध्यासामासुरिति अनीत्रयोयान्युत्तुंगहेमपीठानि आसनानि अध्यासामासुरधितष्ठुः येषुउपविष्टाइत्यर्थः अधिशीङ्स्थासांकर्मेति कर्म त्वं आसउपवेशनेलिट् दयायासश्चेत्याम्प्रत्ययः कृञ्चानुप्रयुज्यतेलिटीत्यस्तेरनुप्रयोगः आम्प्रत्ययवत्कृञोनुप्रयोगस्येति कृञएवे तिनियमादस्तेर्नात्मनेपदं तैः पीठैः केसरिभिः सिंहैः क्रांतानां त्रिकूटस्य त्रिकूटाद्रेः शिखराणामुपमासादृश्यमूहेऊढा वहेः कर्मणिलिट्

अध्यासामासुरुत्तुंगहेमपीठानियान्यमी तैरूहेकेसरिक्रांतत्रिकूटशिखरोपमा ५
गुरुद्वयाय गुरुणोरुभयोरथकार्ययोः हरिर्विप्रतिषेधंतमाचचक्षेविचक्षणः ६

संप्रसारणं त्रीणिकूटानिअस्येति अन्वर्थसंज्ञा कूटोस्त्री शिखरंशृंगमित्यमरः उपमालंकारः ५ गुर्विति अथोपवेशनानंतरंविचष्ट इतिविचक्षणः वक्ता कर्त्तरिल्युडितिन्यासकारः असनयोश्चप्रतिषेधोवक्तव्यइतिचक्षिङः ख्याञादेशाभावः हरिः गुर्वोः उद्धवरामयोः पितृव्यश्रेष्ठभ्रात्रोः द्वयाय द्वाभ्यामित्यर्थः गुरुणोर्महतोरुभयोः कार्ययोः पूर्वोक्तयोः संविप्रतिषेधंविरोधमाचचक्षे आख्यातवान् तुल्यबल विरोधोविप्रतिषेधः ६

युक्तभेदविरोधादिति अत्र हरिवाक्यपूर्वरंगयोः प्रसंजनकत्वरूपसामान्यस्य वाक्यद्वये शब्दांतरेण पृथक् निर्देशात् प्रतिवस्तूपमालंकारः लक्षणं तूक्तं ८ संप्रतिस्वमतमाह करदीकृतेति दिशां जित्वरैर्जयनशीलैः इण्नशजिसर्तिभ्यः करप् कृद्योगात्कर्मणि षष्ठी भ्रातृभिः भीमादिभिः हेतुभिः करदाः षष्ठभागप्रदाः भागधेयो बलिः कर इत्यमरः ततः च्विः ऊर्यादिच्विडाचश्चेति गतिसंज्ञायां कुगतिप्रादयः इति नित्यस

करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशां विनाप्यस्मदलंभूष्णुरिज्यायै तपसः सुतः ९

मासः अकरदाः करदाः संपद्यमानाः कृताः करदीकृताः भूपालाः येन सः वशीकृतराजमंडलः तपसः सुतः धर्मपुत्रः तपश्चांद्रायणादौ स्याद्धर्मे लोकांतरे पि चेति विश्वः अस्मद्विनास्माभिर्विनापीत्यर्थः पृथग्विनेत्यादिना तृतीयाविकल्पात् पंचमी इज्यायै यागाय व्रजयजोर्भावे क्यप् वचिस्वपीत्यादिना संप्रसारणं नमः स्वस्तीत्यादिना चतुर्थी अलंसमर्थो भूष्णुर्भवनशीलः भूष्णुर्भविष्णुर्भवितेत्यमरः ग्लाजिस्थश्च क्स्नुरिति चकाराद्भुवश्च ४

4

कार्यविघ्नप्रतिषेधं निवेद्य तत्र स्वभर्तृभावं दर्शयिष्यन् पंडितमानित्वं तावत् परिहरति भवद्भिरमिति भवद्भिः गंयुष्मद्भ्यां अवसरप्रदानाय प्रसंजनायेत्यर्थः प्रवर्तनायेति यावत् नोस्माकं वचांसि सिद्धांतभावनार्थमुच्यंते न तु सिद्धांतत्वेनेत्यर्थः तथाहि पूर्वं रज्यंते जना अस्मिन्निति पूर्वरंगः नाट्यशालातत्स्थकर्मापि पूर्वरंग इति दशरूपके अतः पूर्वरंगो नाम रंगप्रसाधनार्थं रंगविघ्नशांतिकारी नांदीपाठगीतवादित्राद्यनेकांगविशिष्टो नाट्यादौ कर्तव्यः कर्मविशेषः तदुक्तं वसंतराजीये यन्नाट्यवस्तुनः पूर्वं रंगविघ्नोपशांतये कुशील

भवद्भिरामवसरप्रदानाय वचांसि नः पूर्वरंगप्रसंगाय नाटकीयस्य वस्तुनः ८

वाः प्रकुर्वंति पूर्वरंगः प्रकीर्तितः इति सपूर्वरंगः नाटके भवं नाटकीयं तत्र वर्ण्यमित्यर्थः इष्टारब्धः तस्य वस्तुनः इतिवृत्तस्य प्रसंगाय प्रसंजनाय प्रवर्तनायेति यावत् अतः प्रथमवादो न दोषायेति भावः पूर्वरंगः प्रस्तावनेति रंगराजः तच्चिंत्य पूर्वरंगं विधायादौ सूत्रधारे विनिर्गते प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः प्रथमपूर्वरंगस्यानंतरं प्रस्तावनेति आरंभसर्वनाट्यानामेतत्सामान्यमिष्यते इति दशरूपका

नचैवंस्वार्थपरत्वदोषःस्याल्लोकानुग्रहार्थत्वादस्याःप्रवृत्तेरित्याशयेनाह नदूयेति सात्वतोपत्यंस्त्रीसात्वतीनामहरेःपितृष्वसा तस्यादिभ्यो त्र तस्याःसूनुश्चैद्यःबंधुरपिखलोनमृष्यतइतिभावः मह्यमपराध्यतिद्रुह्यतीतियत् क्रुधद्रुहेत्यादिनाचतुर्थी ततःद्रोहान्नइतिशेषः यत्तु दंनित्यसंबंधात् नदूयेनपरितप्येहं दूङ्दयादिकात्कर्तरिलट् उत्तमपुरुषस्यैकवचनं किंतुलोकंदंदह्यते गर्हितंदहतीतियङ् लुपसदच

नदूयेसात्वतीसूनुर्यन्मह्यमपराध्यति यत्तुदंदह्यतेलोकमदोदुःखाकरोतिमां ११
ममतावन्मतमिदंश्रूयतामंगवामपि ज्ञानसारोपिखल्वेकःसंदिग्धेकार्यवस्तुनि १२

रजपजभदहदशगृभ्यांभावगर्हायामितियङ् जपजभदहदशभंजपशांचेत्यभ्यासस्यनुनागमः अदोलोकदहनंमांदुःखाकरोतिदुःखमनु भावयति दुःखात्प्रातिलोम्येइतिडाच्प्रत्ययः अतश्चैद्यएवाभियातव्यः पार्थस्तुप्रार्थनयापिपश्चात्समाधेयसमर्थइतिभावः ११ स्वमतंनिगम यन्परमतंशुश्रूषुःपृच्छति ममेति तावद्भवत्सतश्रवणपर्यंतमित्यर्थः ममस्मतमिदं अंगेत्यामंत्रणेव्ययं अथसंबोधनार्थकाःस्युःप्याट्प्या-

स्तु भत्ययः किंत्वादुणाभावइतिवृत्तिः अनोजेत्रयाचैवकार्यानयजयात्रेतिभावः ९ ननुयज्ञयात्रायांनजेत्रयाचायामुभयानुसरणंस्यात
त्राह उत्तिष्ठमानइति उत्तिष्ठमानो वर्द्धमानः उदोनूर्ध्वकर्मणीत्यात्मनेपदं परःशत्रुः पथोऽनपेतंपथ्यंहितमार्गेण्यंदेच्छतापुंसेनिशेषः
नोपेक्ष्योनोदासिन्यनद्रष्टव्यः कुतःहियस्माद्वल्र्यनोवर्द्धिष्यमाणो वृद्धः सद्भेतिसदादेशो वृद्ध्यः स्यसनोरितिविभाषापरस्मैपदं नवृद्भ्यश्चतु

उत्तिष्ठमानस्तुपरोनोपेक्ष्यःपथ्यमिच्छता समोहिशिष्टैराम्नातौवर्त्स्यन्तावामयःसच १०

र्थ्यइतीडागमाभावः आमयोव्याधिः रोगव्याधिगदामयाइत्यमरः सशत्रुश्चशिष्टैः नीतिज्ञैः समौतुल्यवृत्ती आम्नातावाख्यातौकथितौ अल्पी

यसोप्यरेर्वृद्धिर्महानर्थायरोगवत् अनस्तस्याद्युपेक्षत्वादुभयानुसृतिः कुतइतिभावः उपमालंकारः १०

७

अथाष्टभिः कुलकेन रामं वर्णयंस्तद्वाक्यमवतारयति तत इति ततो रामो जगादेत्युत्तरेणान्वयः सपत्नो रिपुः रिपुर्वैरिसपत्नारीत्यमरः न
स्यापनयोऽपकारः तस्य स्मरणेन यो नुशयः पश्चात्तापः पश्चात्तापोनुतापश्च विप्रतीकार इत्यपीत्यमरः भवेदनुशयो द्वेषे पश्चात्तापानुबंध
योरिति विश्वः तेन स्फुरतीत्यनुशयस्फुः तेन स्फुरा ओष्ठो बिंबमिवेत्युपमितसमासः रामायाः ओष्ठबिंबस्य चुंबनेन वित्तः प्रसिद्धः रामो

6

ततः सपत्नापनयस्मरणानुशयस्फुरा ओष्ठेन रामो रामोष्ठबिंबचुंबनचुंचुना १४

ष्ठबिंबचुंबनचुंचुः तेन वित्तश्चुंचुप्चणपाविति चुंचुप्प्रत्ययः ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यं तेनोष्ठेनोपलक्षितः समरसुरतयोः सम
रसइति भावः उपमानुप्रासयोः संसृष्टिः १४ ७ ७ ७ ६

डंगांद्वे द्वे भो इत्यमरः वांयुवयोरपि युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावानितिवामादेशः मनंश्रूयतां विधौलोट् तदपिमयाश्रोतव्यमन्यथासंदेहानिवृत्तिरितिभावः ननुविदुषस्तकुतः संदेहस्तत्राह ज्ञातसारः ज्ञाततत्त्वार्थोपिएकः कार्यवस्तुनि कर्तव्यार्थेसंदिग्धेसंशेतेखलुनिश्चितं अतोममापिसंदेह इत्यर्थः दिहउपचये इतिधातोःकर्तरिलट् धलधन्वच सामान्येन विशेषसमर्थनरूपोऽर्थांतरन्यासः

१२

यावदर्थपदांवाचमेवमादायमाधवः विररामगहीयांसःप्रकृत्यामितभाषिणः १३

यावदिति माधवः हरिः यावानर्थो यावदर्थं यावदवधारणइत्यव्ययीभावः यावदर्थपदानि अक्षराणि यस्यास्तां अभिधेयसंमिताक्षरामित्यर्थः एवमुक्तप्रकारांवाचमादाय गृहीत्वा उक्त्वेत्यर्थः विरराम तूष्णीमास व्याङ्परिभ्योरमइतिपरस्मैपदं तथाहि महीयांसः उत्तमाः प्रकृत्यामितभाषिणः मितंभाषंतेतेमितभाषिणः [illegible] इतिभावः पूर्वं [illegible]

आश्लेषेति पुनः आश्लेषलोलुपायाः आलिंगनलुब्धायावध्वाः स्तनयोः कार्कश्यस्य काठिन्यस्य साक्षिणीं उपद्रष्ट्रीं नित्यंपीड्यमानत्वेनेति भावः साक्षाद्द्रष्टरिसंज्ञायामितिसाक्षाच्छब्दादिनिप्रत्ययः वनमालां आपादलंबिनीमाला वनमालाप्रकीर्तिता अभिमानोष्णैरहंकारत्वेनैः मुखानिलैर्निश्वासमारुतैः म्लापयन्ग्लापयन् म्लापयतेर्ण्यंतात्लटःशत्रादेशः आदेचइत्यात्वेपुगागमः अम्लानेम्लानसंबंधाभिधा

आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीं म्लापयन्नभिमानोष्णैर्वनमालांमुखानिलैः १७
दधत्संध्यारुणव्योमस्फुरत्तारानुकारिणीः द्विषद्दूषापरक्तांगसंगिनीःस्वेदविप्लुषः १८

नादतिशयोक्तिः १७ दधदिति पुनःसंध्यायांअरुणेव्योम्निस्फुरंतीःताराः अनुकुर्वतीतितथोक्ताः पुनःद्विषांनशत्रोंद्दूषणशंपणापरक्तअंगवपुषिसंगिनीःसक्ताःस्वेदविप्लुषःस्वेदबिंदून् पृषंतिबिंदुपृषताःपुमांसोविप्लुषःस्त्रियामित्यमरः दधत्दधानः नाभ्यस्तान्छतुरितिनुमागमाभावः ७
उपमालंकारः १८

7

विवक्षितामिति विवक्षितां स्वच्छत्वाभिमानादर्थयत्कृमिष्टां यचैर्भूत्रावासन्नंनात्कर्मणिक्तः नक्षणेविवक्षाक्षणेएवंवस्यविलंबेनोक्तिः प्रतिसं
न्हतांगमानुरोधान्निरुद्धां अर्थविदः कार्यज्ञस्य अतएवपवनव्याधेरुद्दवस्यस्वलङ्किरः गिरंउत्तरपक्षतां सिद्धांतपक्षतां प्रापयन् स्वय
मसत्पक्षावलंबित्वादितिभावः अनेनगमस्याव्यग्रतोक्ता १५ घूर्णयन्निति पुनःमदिरास्वादनमद्यपानेनयोमदस्तेनपाटलितारक्तीकृता

विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृतां प्रापयन्पवनव्याधेर्गिरमुत्तरपक्षतां १५
घूर्णयन्मदिरास्वादमदपाटलितद्युती रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ १६

द्युतिर्ययोस्तेतथोक्ते रेवत्याः देव्याः वदनेयदुच्छिष्टंमद्यलेपनांबूलादि अक्षिचुंबनसंक्रांतमितिभावः तेनपरिपूतेशुद्धे पुटेययोस्ते दृशौ घू
र्णयन् भ्रामयन् इतिमद्यविकारोक्तिः उच्छिष्टपरिपूतेत्यत्र ... सरणात् उच्छिष्टपावनत्वविरो
धस्याभासत्वाद्विरोधाभासोलंकारः आभासत्वेविरोधस्यविरोधाभासउच्यतइतिलक्षणात् १६ ७ ९

नेर्ह्रीरीत्यमरः उद्गमनुद्रन्दिगन् अत्रमदिरागममुखयोः स्वगंधनिरोधानेनरामामुखतङ्गं दूषमद्यगंधस्वीकारात्तद्गुणयोस्तत्रोत्तरस्यात्मविवा
धकत्वेन पूर्वसापेक्षत्वादंगांगीभावेन संकरः तद्गुणस्वगुणत्यागादन्योत्कृष्टगुणाकृतिरिति २० जगादेति वदनमेवछद्मकपटंयस्यतत्सद्मव
दनमेवपद्ममित्यर्थः छद्मादिशब्देनासत्यत्वप्रतिपादनरूपाःपह्नवः तस्यपर्यंतपातिनः प्रांतचारिणः मधुलिहंतीतिमधुलिहः मधुपात्

जगादवदनच्छद्मपद्मपर्यंतपातिनः नयन्मधुलिहःश्वैत्यमुदग्रदशनांशुभिः २१
यद्वासुदेवेनादीनमनादिनवमीरितं वचसस्तस्यसपदिक्रियाकेवलमुत्तरं २२

क्विप् उदग्रैरुच्छ्रितैर्दशनांशुभिःश्वैत्यंधावल्यंनयन्नित्यतद्गुणालंकारः तस्यमधूपसन्निधायकापह्नवसापेक्षत्वात्तेनसंकरः २१ रामोजगाद
यदुक्तंकिंतदित्याकांक्षायामाह यदिति वासुदेवेननदीनमित्यदीनंअकातरं नविद्यतेआदिनवोस्येत्यनादिनवंनिर्दोषं आदिनवोदोषोमतइ
तिहलायुधः यद्वचईरितं उत्तिष्ठमानस्तुपरइत्यादिनायानपक्षमाश्रित्ययदुक्तमित्यर्थः तस्यवचसःसपदिक्रियाकरणंकेवलंसद्यानुष्ठानमेवोत्त ८

8

प्रोल्लसदिति पुनः प्रकर्षेणोल्लसन्तीः कुंडल्योः प्रोतानां स्यूतानां पद्मरागदलानां माणिक्यशकलानां त्विषा कान्त्या प्रोतेति प्रपूर्वाद्वेञः क
र्मणि क्तः यजादित्वात्संप्रसारणं कृष्णोत्तरासंगो नीलोत्तरीयं प्रावारोत्तरासंगौ समौ बृहतिका तथा संव्यानमुत्तरीयं चेत्यमरः नवरुचं
चूतपल्लवस्येमां चौतपल्लवीं विदधत् लोहितमिश्रणात् चूतपल्लववद्धूम्रां कुर्वन्नित्यर्थः धूम्रधूमलौ कृष्णलोहिते इत्यमरः अत्राप्यन्य

प्रोल्लसत्कुंडलप्रोतपद्मरागदलत्विषा कृष्णोत्तरासंगरुचं विदधच्चौतपल्लवीं १९
ककुभिकन्यावक्त्रांतर्वासलब्धाधिवासया मुखामोदं मदिरयाकृतानुव्याधमुद्वमन् २०

दीयत्वयोगात्सादृश्याक्षेपान्निदर्शनालंकारः १९ ककुभीति पुनः ककुभिकन्यायाः रेवत्याः वक्त्रस्यांतः अभ्यंतरे वासेन स्थित्या लब्धोऽ
धिवासो वासना यया सा तया तन्मुखसौरभ्यवासितयेत्यर्थः संस्कारो गंधमाल्याद्यैरधिवासनमुच्यते मदिरया कृतानुव्याधं कृतसंसर्गं प्रियागं
डूषगंधिनमित्यर्थः व्यधजपोरनुपसर्गे [illegible] मुखामोदं मुखगंधविशेषं आमोदः सोऽति

सः सूत्रकल्पस्येत्यर्थः अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखं अस्तोभ्यमनवद्यं च सूत्रं सूत्रविदो विदुरिति लक्षणात् अस्यैव नान्यस्य वाक्यस्य भाष्यभूताः भाष्यैः समाः नित्यसमासः स्मादौ जंनौ च भूतं स्यात् क्लीबे तीते समे त्रिष्विति वैजयंती भवंतु व्याख्यानरूपा भवंत्वित्यर्थः सूत्रव्याख्यानविशेषो भाष्यं सूत्रस्थं पदमादाय वाक्यैः सूत्रानुकारिभिः स्वपदानि च वर्ण्यंते भाष्यं भाष्यविदो विदुरिति भयानुतरेत्र विशेषप्रकाशनाय व्याख्यायते न बतिशयाय प्रत्याख्यायते खंड्यत इत्यदोष इत्यर्थः उपमालंकारः २४ इत्थं यानं सिद्धांतयित्वा नत्वोद्धवप्रतिरोधं तद्दिनिधायत्रि

विरोधिवचसो मूकान्वागीशानपि कुर्वते जडानप्यनुलोमार्थान्प्रवाचः कृतिनां गिरः २५

भिः प्रत्याचष्टे विरोधीति कृतिनां कुशलानां गिरः कर्त्र्यः विरोधिवचसः प्रतिकूलवादिनो वागीशान्वक्तॄनपि वदो वदावदो वक्ता वागीशो वाक्पतिः समा इत्यमरः मूकान्निर्वाचः कुर्वते लज्जयंतीत्यर्थः अनुलोमोनुकूलोर्थोभिधेयं येषांतेनुलोमार्थाः अनुकूलवादिनः तान्जडान्मंदानपि प्रवाचः प्रगल्भवाचः कुर्वते अतो नास्मद्गिरः प्रत्याख्या इति भावः अत्र वागीशानां मुकीकरणाज्जडानां प्रवाचीकरणाच्च श ९

रं सिद्धांतस्यैवोक्तत्वादितिभावः २२ नैतदिति लघुसंक्षिप्तमप्येतद्वचो भूयस्याबहुतरयाविस्तृतयापीत्यर्थः द्विवचनविभज्येत्यादिनाईय सुनिवहोर्लोपो भूचबहोरितिईकारलोपोबहोश्च भूशब्दादेशः वाग्मानातिशय्यतेनातिरिच्यते गुर्वर्थत्वादितिभावः शीङः कर्मणिलटियक् अयङ्यिक्ङितीत्ययङादेशः तथाहि इंधनौघानूदहतीतिइंधनौघधक् काष्टराशिदाहकः भूयानपीत्यर्थः क्विपिघत्वंभष्भावः अग्निर्न्नि

नैतल्लघ्वपिभूयस्यावचोवाचातिशय्यते इंधनौघधगप्यग्निस्त्विषानात्येतिपूषणं २३
संक्षिप्तस्याप्यतोस्यैववाक्यस्यार्थगरीयसः सविस्तरतरावाचोभाष्यभूताभवंतुमे २४

षाप्रभयापूषणंसूर्यं अल्पीयांसमपीतिभावः नात्येतिनाक्रामतिः तेजसःप्रभावत्वमिववचसोर्थवत्वमलंघ्यहेतुरित्यर्थः अत्रसमानधर्म विंबप्रतिविंबतयादृष्टांतालंकारः २३ यदिहरिवचोनातिशय्यते अलंतर्हितवापिवागारंभेरनआह संक्षिप्तेति अतोहरिवचसोऽनतिश यनीयत्वादेवसविस्तरतराःसमपन्नतराः प्रथनेवाविशब्दे इतिधञ्प्रतिषेध. ऋदोरप् इत्यप् भेवानःसंक्षिप्तस्याल्पाक्षरस्याप्यर्थेनगरीय-

ख्यामात्रपाठकानां अशास्त्रज्ञत्वादुद्धवादयोनव्याख्यवचनाइति अभिसंधिः अत्रामरः संधिर्नाविग्रहोयानमासनद्वैधमाश्रयः षड्गुणाः शक्तयस्तिस्रःप्रभावोत्साहमंत्रजाः क्षयःस्थानंचवृद्धिश्चत्रिवर्गोनीतिवेदिनामिति तत्रारिविजिगीषोर्व्यवस्थाकरणमैक्यंसंधिः विरोधोविग्रहः विजिगीषोररिंप्रतियात्रायानंतयोर्मिथः प्रतिबद्धशक्त्योः कालप्रतीक्षयातूष्णीमवस्थानमासनं दुर्बलप्रबलयोर्द्विषोर्वाचिकमात्म

अनिर्लोडितकार्यस्यवाग्जालंवाग्मिनोवृथा निमित्तादपराद्धेषोर्धानुष्कस्येववल्गितं २७

समर्पणंद्वैधीभावः अरिणापीड्यमानस्यबलवदाश्रयणंसंश्रयः कोशदंडोत्थंतेजःप्रभावषड्गुणचिंतनंमंत्रः कर्तव्यार्थेषुस्थेयान् प्रयत्नः उत्साहः गतमन्यदितिसंक्षेपः २६ ननुशास्त्रोक्तार्थव्याख्यानेनशास्त्रज्ञएवव्याख्यवचनइत्याशंक्यनेत्याह अनिर्लोडितेति अनिर्लोडि

क्यवस्तुकरणेरूपोविशेषालंकाररूपभेदेसंबंधरूपातिशयोक्तिः प्रतिबोद्धापित इतिसंकरः २५ नन्वात्मनीनेनस्वामिनाबुद्धेः फलम नाग्रह इतिन्यायेनशास्त्रज्ञवचनंप्रतिकूलमपिश्रारद्धमेवेत्याशंक्याह षडिति दुष्टामेधायेषांतेदुर्मेधसोमंदबुद्धयोपि नित्यमसिच् प्रजा मेधयोरितिसमासांतोऽसिच्प्रत्ययः ग्रंथानोशनसादीनधीत्यपठित्वागुणाः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः षड्शक्तयः प्रभु

षड्गुणाःशक्तयस्तिस्रःसिद्धयश्चोदयास्त्रयः ग्रंथानधीत्यव्याकर्तुमितिदुर्मेधसोप्यलं

२६

मंत्रोत्साहाख्यास्तिस्रः सिद्धयः पूर्वोक्तशक्तित्रयसाध्याः पुरुषार्थलाभात्मकास्ताश्चतिस्रः प्रभुसिद्धिर्मंत्रसिद्धिरुत्साहसिद्धिश्चेति उदयाः आत्मारु यमित्रोदयमित्रमित्रोदयाः वृद्धिक्षयस्थानानित्रीणिन्यायेनोदयाउच्यंते तत्रवृद्धिक्षयौस्वशक्तिसिद्धाः पूर्वावस्थानउपचयापचयौ स्थानंतथा स्यैनावस्थानं तंत्रत्रयमितिव्याकर्तुंव्याख्यातुमलंसमर्थाः पर्याप्तिवचनोऽलमितितुमुन्प्रत्ययः पर्यायगणोयशक्तिविकलानांसंख्यादिस्वरूपस

र्वकार्येष्वित्यर्थः अंगानिस्कंधाइवेतिपूर्ववत्समासः तेषांपंचकंमुक्त्वास्कंधपंचकमिवांगपंचकंहित्वेत्यर्थः पंचपरिमाणमस्येतिपंचकः संख्यायाःसंज्ञासंघसूत्राध्ययनेषुइतिकन्प्रत्ययः सुगतोभक्तिर्भजनीयोयेषांसौगताबौद्धाः भक्तिरित्यण्प्रत्ययः तेषामन्यआत्मेवमहीभृतामन्योनास्ति कर्मणामारंभोपायःपुरुषद्रव्यसंपत्तिः देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिश्चेतिपंचांगानि यथाहकामंदकः सहायाःसाधनोपाया विभागोदेशकालयोः विनिपातप्रतीकारःसिद्धिःपंचांगमिष्यतइति रूपवेदनाविज्ञानसंज्ञासंस्काराःपंचस्कंधाः तत्र विषयप्रपंचोरूपस्कंधः ज्ञानप्रपंचोवेदनास्कंधः आलयविज्ञानसंतानोविज्ञानस्कंधः नामप्रपंचःसंज्ञास्कंधः वासनाप्रपंचःसंस्कारस्कंधः एवंपंचविधापरिवर्तमानोविज्ञानसंतानएवात्मेतिबौद्धाः एवंयथाबौद्धानांसर्वेषुशरीरेषुस्कंधपंचकातिरिक्तआत्मानास्ति तथाराज्ञामुक्तांगपंचकातिरिक्तोमंत्रोनास्तीत्युपमालंकारः तत्त्वास्माकंसमग्रमेवेत्ययमेवयात्राकालइतिभावः २८

तंशालोकिलेकार्यंयेनतस्यकार्याकार्यमजाननइत्यर्थः यन्त्रोस्यसंतीनियन्त्रीवापदूकः यन्त्रोयुक्तिपटुर्वाग्मीवावदूकोतिवक्तरीत्यमरः
यन्त्रोग्मिनिशिनिग्मिनिप्रत्ययः तस्यवाग्जालंवागाडंबरोनिभित्ताद्ध्याद्यात् वेध्यंलक्ष्यंनिभिन्नंचशरव्यंनसगंविदुरितिवैजयंती अपराद्धं
स्खलतिवाणस्यधनुःप्रहरणमस्येतिधानुष्कोधन्वीप्रहरणमितिठक् इसुसुक्तांतात्कः अपराद्धपृषत्कोसौलक्षाच्च्युतसायकः धन्वीधनु

सर्वकार्यशरीरेषुमुक्तांगस्कंधपंचकं सौगतानामिवात्मान्योनास्तिमंत्रोमहीभृतां २८

ष्मान्धानुष्कइत्यमरः तस्यवल्गितमिवचेष्टयानिष्फलं कार्यमस्यवन्त्रोयत्स्वंनलुधावाटस्येतिभावः २७ इत्थंषड्गुणादिपाठमात्रंनमंत्रइतिसिद्धे
स्वयंमंत्रस्वरूपमाह सर्वेति कार्याणिसंध्यादीनितानिशरीराणीवइत्युपमितसमासः व्यासौसौगतानामितिलिंगात् तेषुसर्वेषुकार्यशरीरेष्विव त

किंच नीतिस्वरूपपर्यालोचनयापिनविलंबः कार्यइत्यभिप्रायेणाह आत्मोदयइति आत्मनःउदयोवृद्धिः परस्यशत्रोर्ज्यानिः हानिःवी
ज्याज्वरिभ्योनिरित्यौणादिकोनिप्रत्ययः इतिद्वयंइदंपरिमाणमस्या अस्तीतिइयती एतावती किमिदंभ्यांवोघइतिवतुप्घश्च उगितश्चे
तिङीप् नीतिःनीतिसंग्रहः एतद्द्वयातिरिक्तोनकश्चिन्नीतिपदार्थोस्तीत्यर्थः यदन्यत्षाड्गुण्यादिवर्णनंसर्वोपमस्यैवप्रपंचइत्याह तदि

आत्मोदयःपरिज्यानिर्द्वयंनीतिरितीयती तदूरीकृत्यकृतिभिर्वाचस्पत्यंप्रतायते ३०

12

ति तद्द्वयमुरीकृत्य अंगीकृत्य उरीकृतमुररीकृतमंगीकृतमित्यमरः ऊर्यादिच्विडाचश्चेतिसंज्ञायां कुगतिप्रादयइतिसमासः क्त्वोल्यबादेशः
कृतिभिःकुशलैःवाचस्पत्यंवाग्मित्वं कस्कादित्वादलुक्सत्वे षष्ठ्याःपतिपुत्रेत्यादिनासत्वमितिस्वामी तन्न छंदोविषयत्वात् ब्राह्मणादित्वात्
ष्यञ्प्रत्ययः प्रतायते विस्तार्यते कर्मणिलट् तनोतेर्यकि इत्यात्वं तस्मादात्मोदयार्थिभिरविलंबाच्छत्रुरुच्छेत्तव्यः तन्नांतरीयकत्वान्नस्येतिभावः १२

३०

अथमंत्रितार्थक्रियाविलंबेदोषमाह मंत्रइति संवृतैःगुप्तैः सर्वांगैः पूर्वोक्तैरुपायादिभिरुरःस्थलादिभिश्चउपलक्षितोपिसर्वांगसं
वृतोपीत्यर्थः मंत्रोविचारः अधीरोभीरुः युध्यतइतियोधोभटइव पचाद्यच् परेभ्योन्येभ्योऽरिभ्यश्च परंदूरान्यमुख्येषुपरोरिपरमात्म

मंत्रोयोधइवाधीरःसर्वांगैःसंवृतैरपि चिरंनसहतेस्थातुंपरेभ्योभेदशंकया २९

नोरितिवैजयंती भेदोविदारणंतृतीयगामित्वंचतस्यशंकयाचिरंस्थातुंविलंबितुमित्यर्थः नसहतेनक्षमते शकधृषेत्यादिनातुमुन्
प्रत्ययः अतोनविलंबितव्यंअन्यथामंत्रभेदःकार्यहानिःस्यादितिभावः २९ ८ ९ ९

तथापिसंतोषेदोषमाह संपदेति यः स्वल्पयापिसंपदासुस्थिरमात्मानंमन्यतइतिसुस्थिरंमन्यः स्वस्थमानीभवति आत्ममानेखश्चेतिखश्प्रत्ययेमुमागमः तस्याल्पसंतुष्टस्यतांसंपदंकृतकृत्यस्तावतैवकृतार्थोविधिर्दैवमपिनवर्धयति पौरुषहीनाद्दैवमपिजुगुप्सत नत्ववृद्धिंतः परार्थत्वादितिभावः ३२ किंचपराक्रमलब्ध एवोदयोनान्यइत्याह समूलेति मानिनः अभिमानवंतः परान् शत्रून् समूलंहत्वास

संपदासुस्थिरंमन्योभवतिस्वल्पयापियः कृतकृत्योविधिर्मन्येनवर्धयतितस्यतां ३२

समूलघातमघ्नंतः परान्नोद्यंतिमानिनः प्रध्वंसितांधतमसस्तत्रोदाहरणंरविः ३३

13

मूलघातंअघ्नंतः अत्यंतमनुन्मूलयंतइत्यर्थः समूलाकृतजीवेषुहन्कृञ्ग्रहइतिणमुल्प्रत्ययः कषादिषुयथाविध्यनुप्रयोगइतिहंतेरनुप्रयोगः नोद्यंतिकिंतुहत्वैवोद्यंतीत्यर्थः तत्रहत्वैवोदयेअंधयतीत्यंधं गाढंतमोंधतमसं ध्वांतेगाढेंधतमसमित्यमरः अवसमंधेभ्यस्तमसइतिअच्प्रत्ययः प्रध्वंसितमंधतमसंयेनसःउदयात्प्रागितिभावः रविरुदाहरणंदृष्टांतः अत्रापिदृष्टांतोत्रमहार्णवइतिवदुपमालंकारो नतुदृष्टांतइतिद्रष्टव्यं ३३ १३

ननुलब्धोदयस्य किंपरोछित्येस आह तृप्तियोगइति महीयसांमहात्मनांपरेणातिमभूतेनापिमहिम्ना ऐश्वर्येणतृप्तियोगः संतोषन्ना भोन अव
तृप्त्यभावेपूर्णःसन्चंद्रोदयाकंक्षीरवृद्ध्यर्थमिति भावः महार्णवोदृष्टांतो निदर्शनंउपमानमितियावत् नराज्ञावृद्धावलंबुद्धिःकार्या असंतुष्ट
द्विजानष्टाःसंतुष्टाश्चमहीभुजः सलज्जागणिकानष्टानिर्लज्जाश्चकुलांगनेतिन्यायादितिभावः नायंदृष्टांतालंकारः विंबप्रतिविंबाभावेनौप

तृप्तियोगःपरेणापिनमहिम्नामहीयसां पूर्णचंद्रोदयाकांक्षीदृष्टांतोत्रमहार्णवः ३१

म्यस्यगम्यत्वेतस्योत्थानात् किंतुदृष्टांतशब्देनतस्याभिधानादुपमालंकारः अतएवदृष्टांतोदाहरणनिदर्शनरूपाः शब्दाःप्रयोक्तव्याः पौन
रुक्त्यापत्तेरित्यंकावलीकारः ३१ ७ ७ ७ ६ ६

शेषमृणाच्छेषं शत्रोश्शेषं न शेषयेदिति तात्पर्यं विशेषेण सामान्यसमर्थनरूपोऽर्थांतरन्यासः ३५ ननु क्षुद्रोयं चैद्यः किमस्माकं करिष्यतीत्या
शंक्य नस्य बलवत्तां वक्तुं मित्रामित्रबलाबलविवेकं नावत्करोति सखेति क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः क्त्रिंः
क्त्रेर्मम्नित्यमित्तिमप् सखा सुहृत् गरीयान् बलवान् एवं शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिममित्रशत्रू कार्यतः उप

सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः स्यातामभित्रौ मित्रे च सहजप्राकृतावपि ३६

कारापकाररूपकार्यवशात् निर्वृत्ताविति शेषः उक्तकार्योपाधेर्यावज्जीवमनपायादनयोर्मित्रामित्रभावोप्यनपायीति गरीयस्त्वमिति भावः
सहजप्राकृतौ तु नैवमित्याह स्यातामिति सहजातः सहजः एकशरीरावयववान् तत्र सहजं मित्रं मातृष्वस्रेयः पैतृष्वस्रेयत्यादि सहजशत्रुस्तु
पितृव्यस्तत्पुत्रादिः प्रकृत्या सिद्धः प्राकृतः पूर्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः तत्र विषयानंतरः प्राकृतः शत्रुः तदनंतरः प्राकृतो मि १४

किं नानुच्छिन्नशत्रोः प्रतिष्ठैव दुर्घटेत्याह विपक्षमिति विपक्षं शत्रुमखिलमुच्छिन्नमकृत्वा अनुन्मूल्येत्यर्थः प्रतिष्ठा दुर्लभा खलु तथाहि उदकं कर्तृ धूलिं स्वपरिभाविनीमिति भावः पंकतामनीत्वा अधःकृत्वेत्यर्थः नावतिष्ठते किंतु नीत्वैवतिष्ठतीत्यर्थः समवप्रविभ्यस्थ इत्यात्मनेपदं वाक्यभेदेन प्रतिबिंबानापेक्षा दृष्टांतालंकारः ३४ नन्वयं शिशुपाल एकाकी अस्मान् किं करिष्यतीत्याशंक्याह ध्रियत इति ॥

विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा अनीत्वा पंकतां धूलिमुदकं नावतिष्ठते ३४
ध्रियते यावदेकोपि रिपुस्तावत्कुतः सुखं पुरः क्लिश्नाति सोमं हि सैंहिकेयोसुरद्रुहां ३५

कोपि रिपुर्यावत् ध्रियते अवतिष्ठते धृञ् अवस्थाने इति धातोस्तुदादिकात्कर्तरि लट् रिङ् शयग्लिङ्क्षु इति रिङादेशः तावदवधि सुखं कुतः यावत्तावच्च साकल्येवधारणे इत्यमरः तथाहि सिंहिकायाः अपत्यं पुमान् सैंहिकेयो राहुः तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुद इत्यमरः स्त्रीभ्यो ढक् असुरद्रुहां देवानां पुरः अग्रे सोमं क्लिश्नाति बाधते शत्रुर्यो सोमग्रहणमुपर्यन्तेति भावः तस्मादेकोपि शत्रुश्छेत्तव्य इति भावः अंगः

मित्रयोर्लक्षणंस्वरूपंलक्ष्यंद्रष्टव्यं उपकर्त्रैवमित्रं अपकर्त्रैवशत्रुरित्यर्थः तस्मात्सहजमित्रत्वेपिचैद्यःक्रिययाशत्रुत्वाद्यानव्यएवेतिभावः ३७
अथचैद्यस्यकृत्रिमशत्रुत्वंचतुर्भिराह त्वयेति हेहरेरुक्मिणीहरताबंधुभिःसमस्तैःप्रदत्तांराक्षसधर्मेणोढ्हेत्यर्थः राक्षसोयुद्धहरणादिति
याज्ञवल्क्यः गांधर्वोराक्षसश्चैवधर्म्यौक्षत्रस्यतौस्मृताविति मनुः त्वयाचैद्योविप्रकृतः तथाहि बद्धमूलस्यगूढमूलस्यवैरस्तरोःस्त्रियःम

त्वयाविप्रकृतश्चैद्योरुक्मिणींहरताहरे बद्धमूलस्यमूलंहिमहद्वैरतरोःस्त्रियः ३८
त्वयिभौमंगतेजेतुमरौत्सीत्सपुरीमिमां प्रोषितार्यमणंमेरोरंधकारस्तटीमिव ३९

हत्प्रधानंमूलंहि रूपकसंसृष्टोयमर्थांतरंन्यासः सामान्येनविशेषसमर्थनरूपोर्थांतरन्यासः ३८ अथतेनापित्वंविप्रकृतइत्याह त्वयिभूमेर
पत्यंपुमांसंभौमंनरकासुरंजेतुंगतेसतिसचैद्यइमांपुरींद्वारकांप्रोषितोर्यमासूर्योयस्याः तांमेरोस्तटींसानुमंधकारइवारौत्सीत्रुरुद्धवान्रुधेरनि
टोलुङिसिचिवृद्धिः ३९ ७ ७ २

15

त्रं अपिरलर्थैनोसहजश्चाकृतौतुशत्रू मित्रेवा अमित्रो मित्रन्तस्यानांनावात्मकार्यवशात् अनियमंमनोभयरूपनामापर्यंतं नकृत्रिमशत्रुमि
त्रकृत्रिमशत्रुःशत्रुरेवमित्रंच मित्रमेवनिकृत्रिमावेवमित्रामित्रौगरीयांसौ ननुसहजौनापिप्राकृतौइत्यर्थः अनेनकृत्रिमत्वंमर्वापवादी
तिसिद्धं ३६ एवंचेदस्माकंपेनृपस्येयःशिशुपालःसहजमित्रत्वात्संधातव्योननुयानव्यइत्यत आह उपकर्त्रेति उपकर्त्रोउपकारिणा अरि

उपकर्त्रारिणासंधिर्नमित्रेणापकारिणा उपकारापकारौहिलक्ष्यंलक्षणमेतयोः ३७

णापिसहजेनप्राकृतेनवेतिशेषः संधिःकार्यः अरित्वापवादेनकृत्रिममित्रतायाबलीयस्त्वायज्जीवभाविन्यास्तत्रोत्पन्नत्वादितिभावः एवम
पकारिणामित्रेणापिसहजेनप्राकृतेनवेतिशेषः संधिर्नकार्यः मित्रत्वापवादेनकृत्रिमशत्रुतायाबलीयस्त्वायावज्जीवभाविन्यास्तत्रोत्पन्नत्वादिति

भावः ननुसाक्षादरिणासंदध्यान्मित्रेणवाकथंविरुध्यादित्याशंक्यक्रियायात्तयोर्वैपरीत्याददोषइत्याह हियस्मादुपकारापकारावेवतयोर्मित्रा

दनुपेक्ष्यत इति भावः ४१ अत्राप्युपेक्षायां दोषमाह विधायेति येनरः पुमांसः स्युः पुमांसः पंचजनाः पुरुषाः पूरुषा नर इत्यमरः मा
र्षणः प्रागेव सरोषे अरौ वैरं विधाय स्वयं चापकृत्येत्यर्थः उदासते उपेक्षते तेनरः कक्षे गुल्मे कक्षौ च तृणवीरुधावित्यमरः कक्षस्तु गुल्मम
हिषजरावर्णाश्यदं तृण इति वैजयंती उदर्चिषं अग्निं प्रक्षिप्याभिमारुतं आभिमुख्ये अव्ययीभावः शेरते स्वपंति तद्वन्नाशहेतुरित्यर्थः शीङ

विधाय वैरं सामर्षे नरो रौ य उदासते प्रक्षिप्योदर्चिषं कक्षे शेरते तेभिमारुतं ४२

26

ङो रुडिति रुडागमः अत्र ये उदासते शेरते इति विशिष्टोदासीन शयनयोर्वाक्यार्थयोर्निर्दिष्टैकत्वसंभवात्सादृश्य लक्षणायां असंभवद्वस्तु
संबंधा वाक्यार्थवृत्तिरिति निदर्शनालंकारभेदः नचायं दृष्टांतः वाक्यभेदेन बिंबप्रतिबिंबिकरणात्क्षेपेन तस्योत्थानात् अत्र तु वाक्यार्थे वाक्या
र्थसमारोपात् वाक्यैकवाक्यतायां तदभाव इति अलंकारसर्वस्वकारः ४२ ५ ५ ७

अपकारंनरमाह आलप्यानि सर्वैद्यावभ्रोर्यादवभेदस्यदारान्भार्याः भार्याजायाथपुंभूम्निदारास्यात्तुकुटुंबिनीत्यमरः अपाहरन्इतिय
दिदंदारापहरणं आलप्यांच्चार्य अलंनालपनीयमित्यर्थः अलंखल्वोः प्रतिषेधयोः प्राचांक्त्वेतिक्त्वाप्रत्ययेसमासेल्यबादेशः यतःपापानां
पापिनांकथाकथनमुच्चारणमपि चिंतिपूजिकथिकुंबिचर्चश्चेत्यङ्प्रत्ययः अश्रेयसे अनर्थायाऽलंसमर्थानमःस्वस्तीत्यादिनाचतुर्थी

आलप्यालमिदंबभ्रोर्यत्सदारानपाहरन् कथापिखलुपापानामलमश्रेयसेयतः ५०

विराद्धएवंभवताविराद्धाबहुधाचनः निर्वर्त्यतेरिःक्रिययासश्रुतश्रवसःसुतः ५१

अत्रनिषिध्यमानालपनमश्रेयः प्राप्तिः तन्मुखेनतत्कारणालपननिषेधसमर्थनात्कार्येणकारणसमर्थकोर्थान्तरन्यासः ५० फलितमा
ह विराद्धइति एवंभवताविराद्धःविप्रकृतः राधेरनिटःकर्मणिक्तः बहुधानोस्माकंचविराद्धाविप्रकर्ताश्रुतश्रवानामहरेःपितृष्वसातस्याः
सुतःपंतृषस्त्रियत्वात्सहजमित्र [illegible] क्रियया [illegible] मःशत्रुक्रियनइत्यर्थः अतोवर्जनीयस्त्वा

 अथपरिभवंऽप्यपराक्रमैस्त्रिभिर्निंदामाह माजीवन्निति यःपरस्यापकर्त्तुः अवज्ञयाऽवमानेनयन्नदुःखंतेनदग्धः नमां भनागवमाजीव
न्नगर्हितजीवीमनू माङ्याक्रोशइतिलटःशबादेशः जीवतिप्राणान्धारयति जनन्याःक्लेशकारिणः गर्भधारणश्रमवादिवेदनाकारिणः
तद्व्यतिरिक्तार्थक्रियाहीनस्येत्यर्थः तस्याजननमजननिरनुत्पत्तिरेवास्तु जननीक्लेशनिवृत्त्यर्थमितिभावः आक्रोशंनञ्यनिरितिनञ्पूर्वी

माजीवन्यःपरावज्ञादुःखदग्धोपिजीवति तस्याजननिरेवास्तुजननीक्लेशकारिणः ४५
पादाहतंयदुत्थायमूर्धानमधिरोहति स्वस्थादेवापमानेऽपिदेहिनस्तद्वरंरजः ४६

ज्जनिधातोरनिप्रत्ययः ४५ पादेति यद्रजःपादाहतंपादेनाहतंसत्मूर्धानमाहंतुरेवशिरोधिरोहति तद्रजःअचेतनमपीतिभावः अ
पमानेसत्यपिस्वस्थासंतुष्टाद्देहिनःश्वेतनाद्वरंश्रेष्ठं व्यतिरेकालंकारः ४६ ५ ५ ५ १७

तथापि वांधवत्वात्सोढव्य इत्याशंक्याह मनागनेति यः क्षमी सहनः शीलमस्य शमोऽभ्योधिनुणिति घिनुण्प्रत्ययः स सोढा मनागल्पं वा अभ्यावृत्यापीति भावः अनभ्यावृत्या सकृद्वा अनल्पत्वेति भावः विराध्यंतमपकुर्वाणं भृशं क्षाम्यतु क्षम्यतां संभावनायां लोट् शामामष्टानामिति दीर्घः क्रियासमभिहारेण भृशं पौनःपुन्येन वेत्यर्थः न च पुंवाक्ये ष्वनेकार्थत्वं दोषाय विराध्यंतं कः क्षमेत सोढुं शक्नुयात् न कोपीत्यर्थः शक्लिङ्चे

मनागनभ्यावृत्यावा कामं क्षाम्यतु यः क्षमी क्रियासमभिहारेण विराध्यंतं क्षमेत कः ४३
अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः पराक्रमः परिभवे वैयात्यं सुरतेष्विव ४४

ति शक्यार्थे लिङ् क्षमूष् सहने दैवादिको भौवादिकश्च ४३ ननु सर्वदा क्षमैव पुंसो भूषणं अतो अपराधेऽपि क्षंतव्यमत आह अन्यदेति क्षमा अन्यदा सुरतव्यतिरिक्ते काले योषितो लज्जेव पुंसो भूषणं अन्यदाऽपरिभवे शमो भूषणं परिभवे तु योषितः सुरतेषु वैयात्यं

धार्ष्ट्यमिव धृष्टे धृष्णुर्वियातश्चेत्यादित्यमरः पराक्रमः पौरुषं भूष्यतेऽनेनेति भूषणमाभरणं एवं च क्रियावचनत्वान्नियतलिंगत्वाविरो

एतमपौरुषंदूषयित्वापौरुषंभूषयति तुंगत्वमिति अद्रौतुंगत्वमौन्नत्यं अस्तीतिशेषः अस्तिर्भवंतीपरोप्रयुज्यमानोस्तीतिभाष्यात् भ वनीतिपूर्वाचार्याणांलटःसंज्ञा इतराअगाधतानास्ति सिंधौसमुद्रेअगाधतागंभीरतास्ति इदंतुंगत्वंनास्तिमनस्विनीधीरेतुअलंघनीयताहेतु रलंघनत्वकारणं तदुभयंतुंगत्वमगाधत्वंचतस्माददिसिंधुभ्यामधिकोमनस्वीतिव्यतिरेकालंकारः ४८ संप्रतिशत्रौमार्दवंअनर्थायेत्या

28

तुंगत्वमितरानाद्रौनेदंसिंधावगाधता अलंघनीयताहेतुरुभयंतन्मनस्विनि ४८
तुल्येऽपराधेस्वर्भानुर्भानुमंतंचिरेणयत् हिमांशुमाशुग्रसतेतन्म्रदिम्नःस्फुटंफलं ४९

ह तुल्यइति स्वर्भानुः राहुरपराधेअपकारेतुल्येपिभानुमंतंसूर्यंचिरेणग्रसतेहिमांशुमाशुग्रसतेगिलति यत्ग्रसतेग्लसतेगीर्णावि त्यभिधानात् तन्म्रदिम्नःमार्दवस्यफलंस्फुटं तस्माद्विपक्षेतीक्ष्णेनभा [illegible] इतिभावः एतच्चप्रस्तुतमप्रस्तु

असंपादयतइति किंच जातिर्ब्राह्मणत्वादिः क्रियाइज्याध्ययनादिः गुणःशौर्यादिः तैःसाधनैःकरणंनृनीया कंचिदर्थंमुक्तनकीर्त्यादि पुरुषार्थं अन्यत्रगोत्वजातिपाकशौक्ल्यादिभिःस्वाभिधेयभूतैःकरणैः कंचिदर्थंदोहनादिसंज्ञादिव्यवहाररूपंप्रयोजनमसंपादयतः उभयत्रतादृग्जात्याद्यसंभवादितिभावः पुंसाजन्मसत्तालाभः यदृच्छाशब्दवद्दिच्छापरिकल्पितस्यजात्यादिप्रवृत्तिनिमित्तशून्यस्यडित्थादिशब्दस्येव

असंपादयतःकंचिदर्थंजातिक्रियागुणैः यदृच्छाशब्दवत्पुंसःसंज्ञायैजन्मकेवलं ४७

नत्वनस्येवेतिवतिप्रत्ययः स्वेच्छायदृच्छास्वच्छंदःस्वैरताचेरिताःसमाइतिकेशवः संज्ञायैकेवलंसंज्ञार्थमेवएकत्रपारिभाषिकं किंचिन्नाममात्रमनुभवितुं अन्यत्रतादृङ्नामभावितुमित्यर्थः ४७

छ ए १

भावकर्मणोरित्यात्मनेपदं नदुहस्नुनमांय क्किणावितियक्प्रतिषेधः वायुनातृणमिवाल्पीयसापिरिपुणालघुःक्लेशेनपरिभूयतइत्यर्थः
उपमालंकारः ५० पुनःपौरुषगुणमाह तेजस्वीति दवीयानतिदूरस्थोपि स्थूलदूरेत्यादिनापूर्वगुणयणादिपरलोपौ तेजस्वीतेजस्वि
नांमध्येगण्यतेसंख्यायते तथाहिपंचाग्निसाध्यंतपोयस्यतस्यपंचाग्निमध्येतपस्यतःतपसोर्कःजातवेदसांअग्नीनांपंचमःपंचानांपू
रणःपंचमोजातवेदाभवतीत्यर्थः विशेषेणसामान्यसमर्थनरूपोर्थांतरन्यासः ५१ गुणांतरंचव्यतिरेकेणाह अकृत्वेति उच्चैरुन्न

तेजस्विमध्येतेजस्वीदवीयानपिगण्यते । पंचमःपंचतपसस्तपनोजातवेदसां ५१

अकृत्वाहेलयापादमुच्चैर्मूर्धसुविद्विषां कथंकारमनालंबाकीर्तिर्द्यामधिरोहति ५२

तेषुविद्विषांमूर्धसुहेलयापादमकृत्वाऽनिधाय अनञ्पूर्वेइतिनिषेधात्समासेनल्यबादेशः कीर्तिःकथंकारंकथमित्यर्थः अन्यथैवंक
थमित्थंसुसिद्धाप्रयोगश्चेदिति अनर्थकादेवकरोतेःकथंपूर्वात्णमुल् अनालंबानिराधाराद्यांदिवंअधिरोहति नकथंचिदित्यर्थः किंचि
न्निश्रेण्यादिकमनाक्रम्योत्सेधस्यदुरारोहत्वादितिभावः तस्मात्कीर्तिमिच्छतापुरुषेणपौरुषमेवाश्रयणीयंइतिश्लोकतात्पर्यं कीर्तिन १९

तार्केंदुकथनेनसारूप्यात्प्रतीयतइत्यप्रस्तुतप्रशंसाभेदोयं अप्रस्तुतस्यकथनात्प्रस्तुतंयत्रगम्यते अप्रस्तुतप्रशंसेयंसारूप्यादिनिरूप
तेतिलक्षणात् ४९ एतदेवर्थान्तरेणाप्याह स्वयमिति असाराणांदुर्बलानांनिदर्शनंदृष्टांतः अतएवर्द्रष्टसमासंतृणंबकुतृणंतृणकल्प
मित्यर्थः विभाषासुपोबहुच्पुरस्तादितिबहुच्प्रत्ययः प्रकृतेः पूर्वभवति स्यादीपदसमाप्तौतुबहुच्प्रकृतिलिंगकेइतिवचनात् प्रकृति

स्वयंप्रणमतेल्पेपिपरवायावुपेयुषि निदर्शनमसाराणांलघुर्बहुतृणंनरः ५०

लिंगनालघुः निस्सारःसोनरोल्पेपिपरोवायुरिवेत्युपमितसमासः बहुतृणमितिस्पष्टोपमा सादृश्यात्कल्पदेश्यदेशीयादिनिर्देशा
कल्पत्वादीनामौपम्यवाचकेष्वभिधानात् तस्मिन्नुपेयुषिप्राप्तेसति स्वयंप्रणमते स्वयमेवप्रह्वीभवतिकर्मवत्कर्मणातुल्यक्रियइतिक
र्मवानी यथाहकामंदकः यदासमस्त्त्वसमनिहत्तुपराक्रमात्पूर्वंनमस्थमिव तदाभियायादिदिनानिकुर्वन्नुपांततः कर्षणपीडितानिदर्श

माघ०टी० २०

मज्वरं अपक्वज्वरं प्राप्य आमस्तु रोगभेदे स्यात् आमोपक्वे तु वाच्यवदिति विश्वः कोंभसा परिषिंचति न कोपीत्यर्थः ज्वरितस्यांभः से सर्ग० २
कवत् क्रुद्धस्य शत्रोः सांत्वमुद्दीपकं स्यात् अतो दंड्य इति भावः वाक्यभेदेन प्रतिबिंबकरणापेक्षा दृष्टांतालंकारः ५४ सामेति
सकोपस्य रूढवैरस्य तस्य चैद्यस्य सामवादाः प्रियोक्तयः सहसा प्रतप्तस्य क्वथितस्य सर्पिषः घृतस्य तोयबिंदव इव प्रत्युत वैपरीत्येन दीप
काः प्रज्वलनकारिणः न तु शांतिकरा इत्यर्थः तस्माद्दंड्य एव मनुवचनं तत्प्रोद्वैरिविषयं ५५ एवं स्थिते सति केचिदुद्धवादयः प्रत्या

20

सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः प्रतप्तस्येव सहसा सर्पिषस्तोयबिंदवः ५५
गुणानामायथातथ्यादर्थं विप्लावयंति ये अमात्यव्यंजना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः ५६

चक्षीरन् तान् प्रत्याह गुणानामिति गुणानां संध्यादीनां आयथातथ्यात् यथात्वमनतिक्रम्य वर्तनं इति यथातथं यथायोग्यमितिया
वत् यथार्थं तु यथातथमित्यमरः यथार्थेऽव्ययीभावः स नपुंसकमिति नपुंसकत्वं ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं ततो न तत्पुरुषसमा
से अयथातथं तस्य भावः आयथातथ्यं ब्राह्मणादित्वात् ष्यञ् प्रत्ययः यथातथयथापुरयोः पर्यायेणेति विकल्पान्न पूर्वोपदवृद्धिः न २०

द्वतोरभेदोपचारात्समानकर्तृकतानिर्वाहः अत्रप्रस्तुतायाः कीर्तेर्विशेषेणमहिम्ना अप्रस्तुतप्रासादारोहकस्त्रीव्यवहारप्रतीतेः समासोक्तिः ५२ पौरुषमेवाश्रयणीयमित्यत्रान्वयव्यतिरेकदृष्टांतमाचष्टे अंकेति अंकमुत्संगमधिरोपितोमृगोयेनसंचंद्रमामृगलांछनःमृगांकः निष्ठुरंकठिनंयथातथाक्षिप्तोहतःमृगयूथोमृगसमूहोयेनसः केसरीसिंहोमृगाधिपः उभयत्रापिउच्यतइतिशेषः तस्माच्छत्रौमार्दवंदुष्कीर्तयेपौरुषंतुकीर्तयइतिभावः अत्राप्यप्रस्तुतकथनात्प्रस्तुतार्थप्रतीतेरप्रस्तुतप्रशंसा ५३ ननुसामादिसु

अंकाधिरोपितमृगश्चंद्रमामृगलांछनः केसरीनिष्ठुरक्षिप्तमृगयूथोमृगाधिपः ५३

चतुर्थोपायसाध्येतुरिपौसांत्वमपक्रिया स्वेद्यमामज्वरंप्राज्ञःकोंभसापरिषिंचति ५४

करोपायमुपेक्ष्यकिंपाक्षिकसिद्धिनादंडेन यथाहमनुः सामादानेनभेदेनसमस्तैरथवापृथक् विजेतुंप्रयतेतारीन्नयुद्धेनकदाचनइति तस्मात्सात्वमेवयुक्तमित्याशंक्यदृष्टाभ्यांनिराचष्टे चतुर्थोपायेति चतुर्थोपायसाध्येतुदंडसाध्येरिपौसांत्वंसामसमसांत्वमुभेसमेइत्यमरः अपक्रियाअपकारः तथाहि स्वेद्यंस्वेदार्हंस्वेदेनप्रतिकार्यमित्यर्थः स्वेदस्तुस्वेदनेधर्मइतिविश्वः आ

रादेशः त्वामुत्थापयतिप्रेरयति तदुभयलाभादीदृकालोनकदापिलभ्यतइतिभावः ५७ तत्रशान्त्युपचयंतावल्लंभयति लिलं
घयिषतइति लोकाल्लंघयितुमिछंतो लिलंघयिषतः लंघयतेःसन्नंताल्लटःशता अलंघ्यान् स्वयंदुर्लंघ्यान् कुतः अलघीयसः अति
गुरून् अतएवयादवाःअंभोनिधयइवेत्युपमितसमासः तान्यादवांभोनिधीन् भवतः क्षमातितिक्षावेलेवकूलमिववेलाकूलेपि
वारिधेरितिविश्वः रुंधेप्रतिबध्नाति अन्यथाप्रागेवसर्वंसंहरेयुरितिभावः ५८ अभ्युच्चयश्चायमपरोयदक्लेशेनैवतेविजयला

लिलंघयिषतोलोकानलंघ्यानलघीयसः यादवांभोनिधीन्रुंधेवेलेवभवतःक्षमा ५८
विजयस्त्वयिसेनायाःसाक्षिमात्रेपदिश्यतां फलभाजिसमीक्ष्योक्तेबुद्धेर्भोगइवात्मनि ५९

भइत्याह विजयइति सेनायाःकर्त्र्याःविजयःसाक्षिमात्रेउदासीनेएवफलभाजित्वयिसमीक्ष्योक्तेसांख्योक्ते आत्मनिबुद्धेःमह
त्तत्वस्यमूलप्रकृतेःप्रथमविकारस्यकर्त्र्याःभोगःसुखदुःखानुभवइवापदिश्यतांव्यवह्रियतां भृत्यजयपराजययोःस्वामिगामि
त्वादितिभावः सांख्याःअप्याहुःकर्त्रैवभवत्युदासीनइतिसर्वंप्रत्युपभोगंयस्मात्पुरुषस्यसाधयतिबुद्धिरितिच ५९. ॥छ॥ २१

तस्मादायत्यालभ्याद्यथायोग्यादन्यकालेन्यप्रयोगादित्यर्थः अर्थप्रयोजनं विप्लावयंतिनिष्प्रभं निकार्यहानिं कुर्वंतीत्यर्थः अमात्यानां व्यंजनं चिन्हं येषां ते तथोक्ताः तद्वेषधारिण इत्यर्थः अवर्जोबहुव्रीहिर्व्यधिकरणोजन्माद्युत्तरपद इति वामनः यत्कतस्कशत्रुरिति संज्ञेषां संजाता शत्रुसंज्ञिताः शत्रवएवकूटमंत्रिणो राज्ञां दूषयितुमर्हा दूष्याः गत्यात्याज्या इति यावत् कृत्यानां कर्तरि वेति कर्तरि षष्ठी अतः स्वोक्तं न प्रतिरोद्धव्यमिति भावः ५६ ननु यालभ्यो पि काले यातव्य इत्याशंक्यायमेव काल इत्याह स्वशक्तीति केचिद्वृद्धाः स्वस्यशक्त्युप

स्वशक्त्युपचये केचित्परस्यव्यसने परं यानमाहुरुदासीनं त्वामुत्थापयति द्वयं ५७

चये स्वसामर्थ्यातिरेके यानं यात्रामाहुः यथाह कामंदकः प्रायेण संतो व्यसने रिपूणां यातव्यमित्येव समादिशंति तत्रेप पक्षो व्यसनं त्यनिष्ठं क्षमस्कसंनभ्युदितं प्रतीयादिति परे वृद्धाः परस्य शत्रोर्व्यसने विपदि व्यसनं विपदि भ्रंशो दोषे कामजकोपज इत्यमरः यानमाहुः अत्र मनुः तदायायाद्विगृत्यैव व्यसने चोत्थिते रिपोरिति तत् द्वय उक्तपक्षद्वयकर्तृ उदासीनमनुद्युंजानं ईदास इति शानजाकारस्यैक

नुम्नस्यमानिनोविधुश्चंद्रः विधुंतुदतिहिनस्तिइतिविधुंतुदःराहुः विध्वरुषोस्तुदइतिखश्प्रत्ययेमुमागमः नस्यैवोत्सवाय अ
तोबलिनाबलवानेवयातव्यःबलिनश्चवयमितिभावः ६१ तर्हिपूर्वोदाहृतमन्वादिशास्त्रविरोधस्स्यादित्याशंक्याह अन्यदिति
अन्यदुच्छृखलंअनर्गलं प्रसत्वपीडनक्षममितियावत् संत्वंबलमन्यत् शास्त्रेणोदाहृतंमन्वादिशास्त्रेणनियंत्रितंपरव्यसनेक

अन्यदुच्छृंखलंसत्वमन्यच्छास्त्रनियंत्रितं सामानाधिकरण्यंहितेजस्तिमिरयोःकुतः ६२

ले निर्भिन्नंसत्वमन्यत् उत्क दाद्युत्कटत्वलक्षणवैलक्षण्यमन्यशब्दार्थः तयोः सापेक्षत्वनिरपेक्षत्वाभ्यांमिथोविरोधान्नैकशास्त्रार्थ
त्वंसंभवतीत्यर्थः अत्रदृष्टांतमाह तेजस्तिमिरयोःसमानमधिकरणंययोस्तेतयोर्भावः सामानाधिकरण्यंएकाश्रयत्वंकुतः नकुत
श्चिन् तयोःसहावस्थानविरोधादितिभावः तस्मादुभयोरुदितानुदितहोमवत् भिन्नशास्त्रार्थत्वादितरेतरशास्त्रविरोधोनबाधकइ २२
तिभावः ६२

22

अथ परस्य व्यसनमाह हत इति हिडंबरिपुणा भीमसेनेन द्वयोर्मात्रोरपत्यं पुमान् द्वैमातुरः मातुरुत्संख्यासंभद्रपूर्वाया इति अण्प्रत्ययः उकारश्चांतादेशो रेफपरः तस्मिन् राजि जरासंधे स हि ताभ्यां सपत्नीभ्यां अर्धशः प्रसूतो जरयानाम्न्या पिशाच्या संधितश्चेति कथयंति युधि हते सति चिरस्य चिरकालेन चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यमरः मित्रव्यसनी मित्रभ्रंशवान् व्यसनं विपदि भ्रंश इत्यमरः दमघोषाज्जातो दमघोषजश्चैद्यः सुखेन दम्यत इति सुदमः एकाकित्वात्सुसाध्य इत्यर्थः ६० कष्ट

हते हिडंबरिपुणा राज्ञि द्वैमातुरे युधि चिरस्य मित्रव्यसनी सुदमो दमघोषजः ६०

नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रियै विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवाय सः ६१

श्चायं पक्षोऽभ्युपेत्यवादेनोक्तः वस्तुतस्तु शूराणां अस्माकं अग्रिमपक्ष एवेष्टः शास्त्रसंवादाच्च यथाह कामंदकः यदा क्षमस्तं प्रसभं निहंतुं पराक्रमादूर्जितमप्यमित्रं तदाभियायादहितानि कुर्वन्नुपांततः कर्षणपीडनानि इत्यभिप्रेत्याह नीतिरिति परः शत्रुः आपदि गम्य इति नीतिरिति यत् तदापदि गमनं मानिनः शौर्याभिमानवतो ह्रियै लज्जाकरमित्यर्थः किंतु पूर्ण उपचितगात्रः स्वश

निरुद्धेति किंचदाशार्हाण्यादवाः विवधोधान्यादिप्राप्तिः आसारःसुहृद्बलं प्रसारस्तृणकाष्ठादेःप्रवेशः धान्यादेर्विवधःप्राप्तिरा
सार स्तुसुहृद्बलं प्रसार स्तृणकाष्ठादेः प्रवेश इति वैजयंती नेनिरुद्धायैस्तेतथोक्ताः अन्यत्रनिरुद्धौ विवधानांप्रत्याहारापरना
म्नांस्कंधंवाह्यक्षीराद्याहरणसाधनभारविशेषाणां आसारप्रसारौप्रवेशनिर्गमौयैस्तेतथोक्ताः विवधोविविधोभारःप्रत्याहारश्च

23

निरुद्धविवधासारप्रसारागाइवव्रजं उपरुंधंतुदाशार्हाःपुरींमाहिष्मतींद्विषः ६४

कथ्यतइतिहलायुधः व्रजंगोष्ठं व्रजःस्याद्गोकुलंगोष्ठमितिवैजयंती गाइवमाहिष्मतीपुरीद्विषःअरीन्उपरुधंतुव्रजेगाइव
माहिष्मत्यामरीनावृण्वंत्वित्यर्थः दुह्याचिरुधीतिद्विकर्मकत्वं तत्रपुरीव्रजावकथितंकर्मअन्य दीप्सितंकर्म ६४

तर्हि नः किमिदानीं कार्यमत आह इंद्रप्रस्थेति इंद्रप्रस्थस्य पार्थनगरस्य गमो गमनं ग्रहवृदनिश्चिगमश्चेत्यप्प्रत्ययः मा कार्षीत् तावन्न क्रियताम् एवेत्यर्थः यावत्तावत् परिच्छेदे कार्त्स्न्ये मानावधारण इति विश्वः कृञः कर्मणि लुङ् मांङि लुङित्याशीरर्थे न माङ्योग इत्यडप्रतिषेधः किंतु चेदयः चेदिदेशाः अस्माकमिमे आस्माकाः युष्मदस्मदोरन्यतरस्यां खञ् चेति विकल्पादण्प्रत्ययः तस्मिन्नणि तवकममकावेकवचने इत्यस्माकादेशः

इंद्रप्रस्थगमस्तावत् कारि मा संतु चेदयः आस्माकदंतिसांनिध्याद्वामनीभूतभूरुहः ६२

स्माकावित्यस्माकादेशः सन्निधिरेव सांनिध्यं स्वार्थे ष्यञ्प्रत्ययः आस्माकानां दंतिनां सांनिध्यात् वामनीभूताः शाखाभंगात् खर्वीभूताः भूरुहा येषां ते तथोक्ताः संतु चेदियान्नैव क्रियतामित्यर्थः सा च प्रस्तुता प्रस्तुतेनैव स्वकार्येण गम्यत इति पर्यायोक्त्यलंकारः कारणं गम्यते यत्र प्रस्तुतात्कार्यवर्णनात् प्रस्तुतस्य [illegible] पर्यायोक्तमुच्यते इति [illegible]त् ६२ ७ ७

गृहस्य भित्तीनां प्रतिध्वानैः प्रतिध्वनिव्याजेनेत्यर्थः भयादन्ववदन्नन्वमोदंतेवेत्युत्प्रेक्षा ६७ निशम्येति अधःकृतमक्षजमिंद्रियज्ञा
नंयेनसोधोक्षजः हरिस्ताःशेषस्य शेषावतारस्य बलभद्रस्य गावःवाचःताःशेषगवीः गोरतद्धितलुकीतिटच् टिड्ढाणञितिङीप् निशम्यश्रु
त्वानिशाम्यतीति श्रवणे तथानिशमयत्यपिइति भट्टमल्लः नचशाम्यतेरिदंरूपं अन्यथानिशमय्येतिस्यात् अतएववामनः निशम्य
निशमय्यशब्दौप्रकृतिभेदादिति॥ बृहतांवाचांपत्युःबृहस्पतेः शिष्यायोद्धवाय अभिधातुंवक्तुं दशादकसंज्ञयाप्रस्तावमवसरमादिश

निशम्यताःशेषगवीरभिधातुमधोक्षजः शिष्यायबृहतांपत्युःप्रस्तावमदिशद्दृशा ६८
भारतीमाहितभरामथानुद्धतमुद्धवः तथ्यामुतथ्यानुजवज्जगादाग्रेगदाग्रजम् ६९

त् अतिसृष्टवान् प्रस्तावःस्यादवसरइत्यमरः ६८ भारतीतिअथकृष्णाभ्यनुज्ञानंतरंउद्धवः आहितोभरोअर्थगौरवंयस्यांसा
तांतथ्यांयथार्थांभारतींवाचं अनुद्धतमगर्वितंयथातथागदस्याग्रजंकृष्णंअग्रेग्रतःपुरतइतिप्रागल्भोक्तिःउतथ्यस्यमहर्षेरनु
जोबृहस्पतिःउतथ्यावरजोजीवइत्यमरःतद्वत्तेनतुल्यंजगाद तेनतुल्यंक्रियाचेद्वतिरितिवतिप्रत्ययःतद्धितगतेयमुपमा ६९

24

तर्हि पार्थप्रार्थनायाः कागतिरित्याशंक्योपेक्षैव गतिरित्याह यजतामिति पांडवो युधिष्ठिरो यजतां यागं करोतु इंद्रः स्वर्गमवतु रक्षतु इनोऽर्कः स्तपतु प्रकाशयतां वयं द्विषतः शत्रून् हनाम मारयाम आडुत्तमस्य पिच्चेत्याडागमः सर्वत्र प्राप्तकाले लोट् तथाहि सर्वो जनः स्वार्थप्रयोजनं समीहते अनुसंधत्ते इंद्रादि समानयोगक्षेमो नः पार्थ इत्यर्थः अर्थांतरन्यासः इनः पत्यौ नृपार्कयोरिति मेदिनी ६५ प्रा

यजतां पांडवः स्वर्गमवत्विंद्रस्तपत्विनः वयं हनाम द्विषतः सर्वः स्वार्थं समीहते ६५

प्राप्यतां विद्युतां संपत्संपर्कादर्करोचिषां शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः ६६

इतिसंरंभिणो वाणीर्बलस्यालेख्यदेवताः सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ६७

प्यतामिति किंच द्विषतां शिरश्छेदेन प्रोच्छलनोद्गच्छता शोणितेनोक्षितैः सिक्तैः शस्त्रैरर्करोचिषां संपर्कात्संबधाद्विद्युतां संपल्लक्ष्मीः प्राप्यतामि तिनिदर्शनालंकारः ६६ इती तिहती थं संरंभिणः श्रुतिमत्स्य [illegible] मस्रस्य वा गीरालेख्यदेवताः चित्रलिखितदेवताः स्म भायाः सदो

किंतर्हितूष्णीभूतेनेत्यत्राह तथापीति तथापिबलेननिर्णीतेपितेतवमय्यपिबलभद्रवदेवेत्यपिशब्दार्थः गुरुरित्येवयद्गौरवंआदरस्त
द्गौरवंजल्पतोजल्पनप्रयोज्यकर्मणिममप्रयोजककर्तृत्वंप्रेरकत्वंउपैति अतोवक्ष्यामीत्यर्थः नहिपंडितैःसादरंपृष्टस्यविशेषज्ञस्या
ज्ञवत्तूष्णींभावोयुक्तइतिभावः ७१ ननुरामेणेवसर्वप्रपंचेनोक्तंसंप्रति किंतेवाच्यमस्तीत्याशंक्यवृथाप्रपंचोयमितितद्हृदिनिधायस्तु
वन्नाहवर्णैरित्यादित्रयेणकतिपयैःपरिमितैःवर्णैःपंचाशतैर्वमातृकाक्षरैःकतिपयैःसप्तभिरेवस्वरैर्निषादादिभिःग्रथितस्यगुंफि

तथापियन्मय्यपितेगुरुरित्यस्तिगौरवं तत्प्रयोजककर्तृत्वमुपैतिममजल्पतः ७१

वर्णैःकतिपयैरेवग्रथितस्यस्वरैरिव अनंतावाङ्मयस्याहोगेयस्येवविचित्रता ७२

तस्यवाङ्मयस्यशब्दजालस्य एकाचोनित्यंमयटमिच्छंतिइतिस्वार्थेमयट् गीयतइतिगेयंतस्यगानस्येवविचित्रताअनंताअनंत
भेदारचनाभेदादपरिमिताभवतीत्यर्थः अहोअतस्तेनसाधूक्तेपिविशेषानंत्यात्ममापिवक्तव्यमस्तीत्येकोभावः तस्यदुरुक्तता
न्नमेवास्तीत्यर्थः प्रत्यवयवमिवोपादानादनेकेवेयमुपमास्वरःशब्देऽचिषड्जादावितिहेमचंद्रः ७२ ५ ५

किंगादेत्यत आह संप्रतीति संप्रतिमुद्वालपाणिनानलनद्रेणकेवलंभूरणेवेति ध्वनिः उक्तेसतिवक्तुंअसांप्रतमयुक्तंसाधूक्तत्वात्
आभाससमानयोगप्रसंगादिति ध्वनिः सांप्रतशब्दस्याहार्थत्वात्ळयोगेशाकधृषेत्यादिनातुमुन् तथाहिलेख्येनपत्रेणार्थेवाच्येनिर्धारि
तेनिर्णितेसतिवाचिकंव्यात्हतार्थोवाचंसंदेशवचनमित्यर्थः संदेशवाक्वाचिकंस्यादित्यमरः वाचोव्यात्हतार्थायामितिठक् उत्कारवलु
खलुनवाच्यंखल्वित्यर्थः खलुराद्यः प्रतिषेधेअन्योवाक्यालंकारे निषेधवाक्यालंकारजिज्ञासानुनयेखलुइत्युभयत्राप्यमरः अलं

संप्रत्यसांप्रतंवक्तुमुक्तेमुद्वालपाणिना निर्धारितेर्थेलेख्येनखलूक्त्वाखलुवाचिकं ७०

खल्वोः प्रतिषेधयोः प्राचांक्त्वेति क्त्वाप्रत्ययः इहनयदादौखल्वादयइति निषेधस्योद्देजकाभिप्रायत्वात्नञर्थइव खलुशब्दास्यानुद्वेजकत्वा
भन्नवदेवयदादौप्रयोगेनदुष्येतइत्यनुसंधेयं लिखितार्थेवाचिकमिवबलोक्तेमद्रकेरनवकाशइतिवाक्यप्रतिबिंबकरणात्सप्रस्ता

वद्दृष्टांतः स्तुतिव्याजेननिंदापगमात् व्याजस्तुतिश्च तल्लक्षणंत्वग्रेवक्ष्यामः ७०

अथोद्धवः स्वसिद्धांतं वर्णयिष्यन् स्तुत्यागर्वं परिहरन् हरिमभिमुखीकरोति विशेषेति विशेषं विद्वान् तस्य विशेषविदुषः विशेषज्ञस्य ग
म्यादिपाठात् द्वितीयासमासः नव पुरोग्रे शास्त्रनीतिशास्त्रं उद्ग्राह्यते उपन्यस्यत इति यत् उद्ग्राहितमुपन्यस्तं इति वैजयंती मा तदुद्ग्रह
णमित्यर्थः विधेयप्राधान्यात्स्त्रीलिंगत्वं वक्तुरुद्ग्राहयितुः परिचयस्थैर्ये अभ्यासदार्ढ्ये हेतुर्गुणनिका आम्रेडितमाम्नातमेवेति यावत्
तु न तु वैदुष्यप्रकटनमिति भावः गुण आम्रेडने चौरादिकः ण्यासश्रंथेति युच् ततः संज्ञायां कन् कात्पूर्व पदस्येकारः ७५ संप्रति

·विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ७५

प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि तौ हि मूलमुदेष्यत्या जिगीषोरात्मसंपदः ७६

आत्मनस्तमुपन्यस्यति प्रज्ञेति अतोस्मात्कारणात् स्वमस्यास्तीति स्वामी प्रभुः स्वामिन्नैश्वर्य इति निपातः प्रज्ञोत्साहौ मंत्रोत्साहशक्ती आ
त्मनि स्वस्मिन्नाधातुं संपादयितुं यतेत स्वयमुभयशक्तिमान् भवेदित्यर्थः कुतः हि यस्मात्तौ प्रज्ञोत्साहौ उदेष्यंत्या वर्त्स्यंत्या जिगीषोरा
त्मनः संपदः प्रभुशक्तेर्मूलं निदानं अत्रोत्साहमन्त्रयोः प्राधान्यार्थं प्रभोत्साहस्तथा मंत्रोपि प्रधानो न तु केवलोत्साह इति बलभद्रस्यापवादः ७६ २६

बह्वीति स्वेच्छया स्वप्रतिभानुसारेण प्रकीर्णमसंगतं बह्वपि कामं यथेष्टमभिधीयते किंतु अनुज्झितोर्थसंबंधः पदार्थसंगतिर्यस्मिन्स प्रबंधः संदर्भः दुरुदाहरो दुर्वचः हरतेः खल्प्रत्ययः रामेण तु संगतमेवोक्तं इति स्तुतिः असंगतमेवोक्तमिति निंदा चावगम्यते ७३ त्वदीयसीमिति कुशलाः च कारो त्वदीयसीमति सुकुमाराक्षरां श्लक्ष्णतरां तथापि घनामर्थगुर्वीं अन्यत्र सांद्रां कदलिदलकल्पामित्यर्थः अनल्पैर्ब

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते अनुज्झितार्थसंबंधः प्रबंधो दुरुदाहरः ७३
त्वदीयसीमपि घनामनल्पगुणकल्पितां विस्तारयंति निपुणाश्चित्रां वाचं पटीमिव ७४

हुभिर्गुणैः श्लेषादिभिस्तंतुभिश्च कल्पितां रचितां निर्मितां चित्रां चित्ररूपां च वाचं पटीं शाटीमिव विस्तारयंति प्रसारयंति रामवागप्येवं विधेति स्तुतिः रामवाक्तु नैवं विधेति निंदा च गम्यते अत्र श्लेषस्य शुद्धविषयासंभवेन सर्वालंकारबाधकत्वादुपमाप्रतिभोत्थापितः प्रकृताप्रकृतश्लेषोयमित्यलंकारसर्वस्वकारः अ... ७४.

अथप्रज्ञाप्रज्ञयोर्द्वाभ्यांवैषम्यमाह स्पृशंतीति तीक्ष्णानिशितप्रज्ञाःशरवच्छरेणतुल्यंस्तोकंस्वल्पमेवस्पृशंतिअंतःकार्यस्यांतरंवि
शंतिच अाल्पायासेन बहुकार्यंसाधयंतीत्यर्थः बहुस्पृशाव्यापिनास्थूलेनमंदेनदृहताश्मनायंत्रोपलेनतुल्यमभवत् तेनतुल्यं
क्रियाचेद्वृतिः बहिरेवंकार्यस्याकार्यस्यचेतिभावः स्थीयतेस्थितिःक्रियतेमूढोत्यल्पस्यहेतोःबहुप्रयस्यन् मूषकग्रहणायशिखरि

स्पृशंतिशरवत्तीक्ष्णाःस्तोकमंतर्विशंतिच बहुस्पृशापिस्थूलेनस्थीयतेबहिरश्मवत् ७८
आरंभतेल्पमेवाज्ञाःकामंव्यग्राभवंतिच महारंभाःकृतधियस्तिष्ठंतिचनिराकुलाः ७९

खननवत्परिहासास्पदंभवतीतिभावः तद्धितगतेयमुपमा ७८ आरभंतइति किंचअज्ञाः अल्पंतुच्छमेवार्थमारभंतेप्रक्रमंतेका
ममत्यंतंव्यग्रास्त्वरिताश्चभवंतिनचपारंगच्छंतीतिभावः कृतधियःशिक्षितबुद्धयस्तेमहारंभामहोद्योगाभवंतीनिराकुलाअव्यग्राश्चभवं
तिपारंगच्छंतीतिभावः ७९

उत्साहवन् प्रज्ञापिग्राह्येत्युक्तं नस्याः प्रयोजनमाह सोपधानामिति येधाराः धीमंतः सोपधानां सविशेषां युक्तियुक्तामित्यर्थः अन्यत्र सगेंदुकां सोपबर्हामित्यर्थः उपधानं विशेषे स्यात् गेंदुके प्रणयेपि चेति विश्वः स्थेयसीं स्थिरतरां अचपलां द्रढियसींचास्थिरशब्दादीयसुनि प्रियस्थिरेत्यादिनास्थादेशः धियं खट्वयंति खट्वांपर्यंकं कुर्वंति आश्रयंतीत्यर्थः शयनं मंचपर्यंकपल्यंकाः खट्वया समाइत्यमरः तत्क

सोपधानां धियं धीराः स्थेयसीं खट्वयंति ये तत्रानिद्रां निषण्णास्ते जानंते जातु न श्रमं ७७

रोति तदाचष्ट इति णिच् नेधीरास्तत्र धीखट्वायां अनिद्रं निषण्णाः विश्रांताः संतो जातु कदापि श्रमं खेदं न जानंते न विंदति श्रमः खेदो ध्वरे त्यादेरिति लक्षणं धी पूर्वक एवोत्साहः सन् न तु केवल इति सर्वथा धी राश्रयणीयेत्यर्थः तत्रधियः आरोप्यमाणायाः प्रकृत श्रमापनोदरूपोपकारपर्यंतनया परिणामालंकारः आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति लक्षणात् ॥७७॥ ५ ५

28

त्यजन् प्रयुंजान एवनतु निरुद्योग इतिभावः उदेतुं कल्पते उदयाय भवती उत्साहशक्तिरेव प्रभुशक्तेरपि मूलमित्यर्थः नानालिंगत्वा
त्हेतूनां नाना सूर्यत्व मितिप्रतीतेः प्रतिमासमादित्यभेदात् द्वादशत्वं तच्चैकस्यैव द्वादशात्मकत्वात् द्वादशात्मा दिवाकर इत्यभिधानात्
तेचार्यमादयः पुराणोक्ताः द्रष्टव्याः राजानस्तु अरिर्मित्रमरेर्मित्र मित्रमित्रमतः परं तथारिमित्र मित्रंच विजिगीषोः पुरःसराः
पंचेतिशेषः पार्ष्णिग्राहस्ततः पश्चादाक्रंदस्तदनंतरं असारावनयो श्चैव विजिगीषोस्तु पृष्ठतः पार्ष्णिग्राहासार आक्रंदासार

उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि जिगीषुरेको दिनकृदादित्येष्विव कल्पते ८१

श्चेत्यर्थः अत्र चत्वार इति शेषः एवं नव भवंति विजिगीषुर्दशमः अरेश्च विजिगीषोश्च मध्यमो भूम्यंतरः अनुग्रहे संहतयोः सम
र्थो व्यस्तयोर्वधे मंडलाद्बहिरे तेषां उदासीनो बलाधिकः अनुग्रहे संहतानां व्यस्तानांच वधे प्रभुरिति भूम्यंतर मध्यमौ मध्यमोदासी
नाभ्यां सह द्वादश वेदितव्याः पूर्णोपमा ८१ ५ ५ ५ ५ २९

अथप्रज्ञावानपिनप्रमाद्येदित्याह उपायमिति उपायमास्थितस्यप्राप्तस्यापि उपायेनैवकार्यंसाधयतोपीत्यर्थः किमुतव्यग्रतयेतिभावः प्रमाद्यतोनवधानस्य प्रमादोनवधानता इत्यमरः अर्थाःप्रयोजनानिनश्यंतितथाहिशयालुर्निद्रालुः अलुच्शीङोग्रहणादालुच् मृ गान्यातीतिमृगयुःव्याधः मृगय्वादयश्चेत्यौणादिकोयुप्रत्ययांतो निपातः व्याधोमृगवधाजीवोमृगयुर्लुब्धकोपिसइत्यमरः उप

उपायमास्थितस्यापिनश्यंत्यर्थाःप्रमाद्यतः हंतिनोपशयस्थोपिशयालुर्मृगयुर्मृगान् ८०

शेतेस्मिन्निति उपाशयो मार्गस्थायिनोव्याधस्यात्मगुप्तिस्थानंगर्तविशेषः एरजित्यच्प्रत्ययः तत्रतिष्ठतीत्युपशयस्थोपिमृगान्नहंति विशेषेणसामान्यसमर्थनरूपोर्थांतरंन्यासः ८० एवंप्रज्ञाया आवश्यकत्वमुक्तं तथोत्साहस्याप्याह उदेतुमिति जेतुमिच्छुः जिगीषुः एकएवद्वादशात्मापि राजसुराज्ञानुमन्योदयशोकादिष्वेषु दिनकरो दिनकरप्रोद्यधियमाण आदित्यःसइवेहामुत्साहम

जनकोपी इति राज्ञोल्लोकसंबंधेप्यसंबंधात्तस्यातद्रूपातिशयोक्तिः साच बुद्धिशस्त्र इत्यादिरूपकनिर्व्यूढेतितेन संहांगीभावेन संकरः ८२
चतुर्थोपायसाध्य इत्यादिनायत्क्षात्रमेव कर्तव्यमुक्तं तत्रोत्तरमाह तेज इति कालं जानातीति कालज्ञः तस्य कस्यायं काल इति विदुष इ
त्यर्थः आतोनुपसर्गेकः नन्विगुपधेत्यादिना कः विधेयसमासेकर्मोपपदस्यैव बलवत्वभाषणात् तस्य महीपतेः तेजः क्षात्रमेव क्ष

तेजः क्षमा वा नैकांतः कालज्ञस्य महीपतेः नैकमोजः प्रसादो वा रसभावविदः कवेः ८३

मैवेति वा एकांतो नियमो नास्ति किंतु यथाकालमुभयमप्याश्रयणीयमित्यर्थः तथा रसान् शृंगारादीन् भावान् निर्वेदादींश्च वेत्ति यस्तस्य
रसभावविदः भावग्रहणं संपातायातं कवेः कवयितुरेकं केवलमोजः प्रौढबंधत्वं वा एकः प्रसादः सुकुमारबंधत्वं वा न किंतु तत्तद्रसानुगुण्ये
न यथायोग्यमुभयमप्युपादेयं दृष्टांतालंकारः ८३

उपायमार्गस्थितस्यैतस्य राज्ञो नाममात्रं स्यादित्युक्तं अथ अप्रमादप्रकारमाह बुद्धिशस्त्र इति बुद्धिरेव शस्त्रं यस्य सः बुद्धिशस्त्रः अमोघत्वा-
त्वान्तस्य इति भावः प्रकृतयः स्वाम्यादिराज्यांगानि राज्यांगानि प्रकृतय इत्यमरः ता एवांगानि यस्य स प्रकृत्यंगः नैकैकस्य वा राज्ञो वै-
कल्यं स्यादिति भावः घनाद्दुर्भेद्यात्संवृतिर्मन्त्रगुप्तिरेव कंचुकः कवचो यस्य स तथोक्तः मंत्रभेदे राज्यभेदः स्यादिति भावः चरन्तीति चराः
पचाद्यच् स एव चारो गूढपुरुषः प्रज्ञादित्वात्स्वार्थिकोऽण्प्रत्ययः चारश्च गूढपुरुष इत्यमरः स एव ईक्षणं चक्षुर्यस्य स चारेक्षणः अ-

बुद्धिशस्त्रः प्रकृत्यंगो घनसंवृतिकंचुकः चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ८२

न्यथास्य परमंडलवृत्तांतादर्शनादंधस्येवांधलस्य पदे पदे विनिपातः स्यादिति भावः स्यात्संदेशहरो दूत इत्यमरः दूत एव मुखं द्वारं यस्य
सो दूतमुखः अन्यथा मुखस्येव वाग्व्यवहारासिद्धौ तत्साध्यासाध्यकार्यप्रतिबंधः स्यादिति भावः एवंभूतः पार्थिवः कोऽपि पुरुषः अ-
न्य एवायं लोकविलक्षणः पुमानित्यर्थः अतो राज्ञा सर्वादिसंयमनेन भवितव्यं एतदेवाप्रमत्तत्वं अन्यथा स्वरूपहानिः स्यादिति भावः

 तर्हि पौरुषमात्रं नित्यं क्षममाणस्य दैवमेव श्रेयो विधास्यतीत्याशंक्याह नालंबत इति विद्वानभिज्ञः दिष्टं मतिरस्येति दैष्टिकः दैवप्रमाणक
इत्यर्थः दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिरित्यमरः अस्ति नास्ति दिष्टं मतिरिति ठक् तद्भावः दैष्टिकता तामेव नालंबते सर्वथा यद्द
विष्यस्य विनाशादिति भावः तथा पौरुषे केवलपुरुषकारेपि युवादित्वादण्प्रत्ययः न निषीदति न नितिष्ठति दैवप्रातिकूल्ये तस्य वैफल्यादिति भा

नालंबते दैष्टिकतां न निषीदति पौरुषे शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ८६

30

वः किंतु सत्कविः सम्यक्कवयिता शब्दार्थाविव तयोः काव्यशरीरत्वादिति भावः यथाह वामनः अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्य
मिति द्वयं पौरुषं दैवं चापेक्षते अतः पौरुषमप्यावश्यकमेव तत्तु काले कर्तव्यमिति विशेषः ८६

९ ९ ३ ३०

यदुक्तं क्रियासमभिहारेण विराध्यंतं क्षंतव्य इति तत्रोत्तरमाह कृतापचार इति परैः शत्रुभिः कृतः अपचारो अपकारोऽपथ्यं च यस्य स तथा
पि अनाविष्कृतविक्रियः अंतर्गूढविकारः अतएवासाध्योऽतिसमाधेयः सन् गदो यथा रोग इव इवशब्दार्थेपि यथाशब्द इति दंडी का
लेबलक्षयावसरं प्राप्ते सति कोपं कुरुते प्रकुप्यतीत्यर्थः तदुक्तं वहेदमित्रं स्कंधेन यावत्कालविपर्ययः तमेवत्वागते काले भिंद्याद्घटमिवाश्म

कृतापचारोपिपरैरनाविष्कृतविक्रियः असाध्यःकुरुतेकोपंप्राप्तेकालेगदोयथा ८४
मृदुव्यवहितंतेजोभोक्तुमर्थान्प्रकल्पते प्रदीपःस्नेहमादत्तेदशयाभ्यंतरस्थया ८५

नीइति ८४ इतश्च क्षंतव्यमिदानीमित्याह मृद्विति मृदुना मृदुवस्तुना व्यवहितमंतर्हितं तेजोर्थान्भोक्तुं प्रकल्पते प्रभवति तथाहि प्रदीपो
भ्यंतरस्थया मध्यस्थया दशया वर्त्या स्नेहं तैलादिकमादत्ते अन्यथा स्वयमेव निर्वायादिति भावः क्षांतिपूर्वकमेव क्षात्रं फलतीति सर्वथाप्यय
मतः क्षंतव्यमिति भावः दशावर्तावबस्थायां स्नेहस्तैलादिके रस इति विश्वः विशेषेण सामान्यसमर्थनादर्थांतरन्यासः ८५ ७

क्षांतिपक्षगुणवगुणांतरमाह तंत्रेति तंत्रावापौस्वपराष्ट्रचिंते अन्यत्र तंत्रावापंत्वास्त्रौषधप्रयोगंच चेत्यियः तेनतंत्रावापविदा तत्रंस्व
राष्ट्रचिंतायामवापःपरिचिंतनं शास्त्रौषधांतमुख्येषुतंत्रमितिवैजयंती योगैःसामाद्युपायैः अन्यत्रदेवताध्यानैश्च योगःसंहननोपाय

तंत्रावापविदायोगैर्मंडलान्यधितिष्ठता सुनिग्रहानरेंद्रेणफणींद्राइवशत्रवः ८८

31

ध्यानसंगतियुक्तिषित्यमरः मंडलानिस्वपरराष्ट्राणि महेंद्रादिदेवतायतनानिच अधितिष्ठता आक्रमतानरेंद्रेणराज्ञाविषवैद्येनच
नरेंद्रोवार्तिकेराज्ञिविषवैद्यपिकथ्यतइतिविश्वः शत्रवःफणींद्राःसर्पाइवसुनिग्रहाःसुखेननिग्राह्याः एवंचप्रकृतामकृतविषयःश्लेषरूपमे ३१
वेतिकेचित् ८८

अक्षः क्षांतेः फलभाक् स्थायिन इति रस्यते स्वाद्यत इति रसः शृंगारादिः रसतेः स्वादनार्थत्वात् रस्यंत इति रसा इति निर्वचनात् तस्य रसस्य रसं तरतः स्थायिनः स्थायी भावस्य रसादेः रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयानि च जुगुप्साविस्मयश्चाष्टौ स्थायी भावाः प्रकीर्तिताः इत्युक्त त्वात्तस्यैवार्थे स्वादुभावरूपे प्रयोजने भूयांसः संचारिणो व्यभिचारिणो भावः निर्वेदादयः विभावादीनामुपलक्षणमेतत् तथा प्रवर्तंते तदुक्तं विभावै रनुभावैश्च सात्विकैर्व्यभिचारिभिः आनीयमानः स्वादुत्वं स्थायीभावो रसः स्मृत इति तथापि स्थायिनः स्थिरस्य क्षांत्याकालं प्रतीक्षमा

स्थायिनोर्थे प्रवर्तंते भावाः संचारिणो यथा रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ८७

णस्येत्यर्थः तस्यैकस्य नेतुर्जिगीषोर्नायकस्यार्थे प्रयोजने भूयांसो महीभृतः राजानः प्रवर्तंते स्वयमेव तस्य कार्यं साधयंतीत्यर्थः ततः क्षंतव्यमिति भावः केचित्तु भावपदस्यापि रागपरत्वमाश्रित्य यथा संचारिणः प्रसंगादागंतुकाः अन्ये रसाः स्थायिनः स्थिरस्यैकस्य मुख्य स्यार्थे प्रवर्तंते यथास्मिन्नेव काव्ये वीरशृंगारादय इति व्याचक्षते उपमालंकारः ८७ ७ ७ ७,

विमृश्यकारिणस्तु विश्वमपि विधेयंस्यादिति त्रयेणाह अनल्पेति अनल्पत्वात्प्रज्ञोत्साहाधिकत्वादत एव प्रधानत्वान्मंडलाभिज्ञ
त्वात् अन्यत्रानल्पत्वादुच्चैस्तरत्वात्प्रधानत्वान्नायकस्वरत्वाच्च वंशस्य वंशवाद्यस्वरस्य इतरे वीणागानादिशब्दाइव अथवा आश्रयत्वाद्वं
शाइव वंशस्तत्कालविहितःस्वरउच्यते तस्य इतरेस्वराः षड्जादयइव विजिगीषोर्नृपतयः अन्येमंडलपरिवर्तिनोराजानःपरिवा
रतांपोष्यतांप्रयांति तत्कार्यमेव साधयंतीत्यर्थः तस्माद्विमृश्यकर्तव्यमित्यर्थः ९० अपीति किंच अनारभमाणस्यस्वयम

अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरेस्वराः विजिगीषोर्नृपतयःप्रयांतिपरिवारितां ९०
अप्यनारभमाणस्यविभोरुत्पादिताःपरैः व्रजंतिगुणतामर्थाःशब्दाइवविहायसः ९१

कुर्वाणस्यापि विभोः प्रभोः व्यापकस्य च परैरन्यैर्नृपतिभिः शंखभेर्यादिभिश्च उत्पादिताः संपादिताः जनिताश्चार्थाः प्रयोजनानि वि
हायसः आकाशस्य शब्दाइव गुणतां विशेषतां काणादोक्तं गुणत्वं व्रजंति शक्तोहिराजास्वयमुदासीनएवाकाशवत्स्वमहिम्नैव
कार्यदेशं व्याप्नुवन् शब्दानिव सर्वार्थानपि स्वकीयतां नयतीत्यर्थः गुणस्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतंतुषिति वैजयंती ९१ ३२

प्रज्ञोत्साहवतः स्वामी त्यंश्चेतावेव प्रभुशक्ते र्मूलमित्युक्तं तदेवव्यनक्ति करेति उत्तुंगोमहोन्नतः प्रज्ञावलं मंत्रशक्तिरेव बृहत्प्रधानं मूलं य स्य सउत्साह एवपादपः करेणवलिना प्रचेयां वर्धनीयां हस्तग्राह्यांच वलिहस्तांशवः करा इत्यमरः प्रथीयसीं पृथुतरां रक्तु नोहलादे

करप्रचेता मुत्तुंगः प्रभुशक्तिं प्रथीयसीं प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ८९

रितिरेफादेशः प्रभुशक्तिं तेजोविशेषं सप्रभावः प्रतापश्चयत्तेजः कोशदंडजमित्यमरः फलति प्रसूत इत्यर्थः फलनिष्पत्तौ मंत्रपू र्वक एवोत्साहः स्वतः विपरीतस्तु छिन्नमूलो वृक्षइव शुष्यतीति भावः रूपकालंकारः ८९

अथविमृश्यकारिणः प्रकारमाह षाड्गुण्यमिति जिगीषुः शक्तिंप्रभावादित्रयंबलंचापेक्षतइतिशक्त्यपेक्षः सन् पचाद्यच् शक्तिर्ब
लेप्रभावादावितिविश्वः षड्गुणाएवषाड्गुण्यंसंधिविग्रहादिषट्कं चातुर्वर्ण्यादित्वात्स्वार्थेष्यञ्प्रत्ययः तदेवरसायनमौषधविशेष

33 षाड्गुण्यमुपयुंजीतशक्त्यपेक्षोरसायनं भवंत्यस्यैवमंगानिस्थास्नूनिबलवंतिच ९३

सुपयुंजीतसेवेत रसायनं विहंगेपिजराव्याधिभिदौषधइतिविश्वः एवंसतिअस्यप्रयोक्तुरंगानिस्वाम्यादीनिगात्राणिच स्थास्नूनि
स्थिराणिकालांतरक्षमाणीत्यर्थः ग्लाजिस्थश्चक्स्नुः बलवंतिपरपीडाक्षमाणिच भवंतिश्लिष्टपरंपरितरूपकं ९३ ३३

यातव्येति किंचएकार्थएकप्रयोजनंसएवतंतुःसूत्रंतत्रप्रोतायांएकगुणाभिलाषिण्यामित्यर्थः प्रपूर्वाद्वेञःकर्मणिक्तः वचिस्वपीत्यादि नासंप्रसारणं यातव्योऽभिषेणयितव्यः अरिःपार्ष्णिंगृण्हातीतिपार्ष्णिग्राहः पृष्ठानुधावी कर्मण्यण् तौआदीयेषांतेपूर्वोक्ताःपंक्तिरााःस्थिताः तएवमालारत्नमालिकातस्यामधिकद्युतिर्महातेजाःनायकःशक्तिसंपन्नोजिगीषुर्नायकायतेमध्यमणिरिवाचरति स्व

यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः एकार्थतंतुप्रोतायांनायकोनायकायते ९२

यमेवसर्वोत्कर्षेणवर्ततइत्यर्थः तस्माद्विमृश्यकर्तव्यमितिभावः नायकोनेतरिश्रेष्ठेहारमध्यमणावपीतिविश्वः उपमानादाचारइति क्यङ् अकृत्सार्वधातुकयोरितिदीर्घः नायकायतइत्युपमा अन्यथाशास्त्रविरोधात् एकार्थतंतुत्वित्यत्ररूपकत्वेअधिष्ठानतिरोधानत्वे नारोप्यमाणतंतुत्वस्यैवोदात्त[illegible]पिरूपकमेवतदनुप्राणिताचेय सुपमेत्यंगांगिभावेनसंकरः९२

फलितमाह तदिति तत्तस्मादत्राक्यार्थस्यअकार्यत्वाच्चेदीनामीशितारंनंशिशुपालंभवान्मावमंस्तनावमन्यस्व मन्यतेर्माङिलुङ् अनुदात्तत्वादिडागमाभावः कुतः यतः यश्चैद्यउदात्तः स्वरानिवसंतिशिष्टानुदात्तानिवारीनेकपदेएकस्मिन्पदन्यासेस्रुप्तिङंतपदलक्षणेच निहंतिहिनास्तिनीचैःकरोतिच अतिक्रूरत्वात् अनुदात्तंपदमेकवर्ज्यमितिपरिभाषाबलाच्चेतिभावः ९५ नचायमेकाकी किंनःकरिष्यती

तदीशितारंचेदीनांभवांस्तमवमंस्तमा निहंत्यरीनेकपदेयउदात्तःस्वरानिव ९५
मावेदियदसावेकोजेतव्यश्चेदिराडिति राजयक्ष्मेवरोगाणांसमूहःसमहीभुजां ९६

34

तिमंतव्यमित्याह मावेदीति असौचेदिराडेकाकीअतोजेतव्यः स्रुजयइतिमावेदिमाज्ञायि वेत्तेः कर्मणिमाङिलुङ् यद्यस्मात्सचेदिराट् राज्ञश्चंद्रस्ययक्ष्माराजाचासौयक्ष्मेतिवाराजयक्ष्माक्षयोरोगोरोगाणामिवमहीभृतांसमूहः समष्टिरूपः यथाहवाग्भटः अनेकरोगानुगतो वहुरोगपुरोगमः राजयक्ष्माक्षय... राजाराजयक्ष्मारोगाणांचततोम

स्थानइति किंचस्थानेशक्यविषयेशमवतांक्षमावतां अंगिनांसक्षांगिनांराज्ञांशरीरिणांच शक्त्याप्रभावाद्यनुसारेणचव्यायामेव्यापारेषा
ड्गुण्यप्रयोगेगमनादौचसतीत्यर्थः वृद्धिरुपचयोराज्यस्यशरीरस्यचेतिभावः विपक्षेबाधकमाह अयथाबलंशक्त्यतिक्रमेण यथा
सादृश्यइत्यव्ययीभावेनञ्समासः आरंभोव्यायामः क्षयसंपदोत्यंतहानेर्निदानं आदिकारणं अंगानामितिभावः तस्मादस्माक

स्थानेशमवतांशक्त्याव्यायामेवृद्धिरंगिनां अयथाबलमारंभोनिदानंक्षयसंपदः ९४

मकस्माच्चैद्यास्कंदनमश्रेयस्करमितिभावः अत्रविशेष्यस्यापिश्लिष्टत्वात्शब्दशक्तिमूलोवस्तुनावस्तुध्वनिः अतोह्ययानामंगि
नांऔपम्यंचगम्यतइतिसंक्षेपः ९४

येचेति किंचये अन्येच कालयवन शाल्वरुक्मिद्रुमादयोराजानः तमःस्वभावास्तमोगुणात्मकाः अतएवतेपिप्रदोषंप्रकृष्टदोषंतामसमेनंचैद्यमनु याथिनः अनुयास्यंतिसादृश्यादितिभावः भविष्यतिगम्यादयइतिणिनिर्भविष्यदर्थे अकेनोर्भविष्यदाधमर्ण्ययोरितिषष्ठिप्रतिषेधात् द्वितीया यथा ध्वांतंरजनीमुखमनुयातितद्वदितिवस्तुनालंकारध्वनिः राहौध्वांतेगुणेतमइत्यमरः प्रदोषोदुष्टरात्र्यंशावितिवैजयंती ९८

येचान्येकालयवनशाल्वरुक्मिद्रुमादयः तमःस्वभावास्तेप्येनंप्रदोषमनुयायिनः ९८
उपजापकृतस्तेनतानाकोपवतःस्त्वयि आशुदीपयिताल्पोपिसाग्नीनेधानिवानिलः ९९

35

ननुबाणादयोऽस्माभिरिदानींकृतसंधानाःविरोध्यंतीत्यत्राह उपजापइति तेनचैद्येनकृतोल्पोप्युपजापोभेदः भेदोपजापावुपधाइत्यमरः त्वयिअकोपवतःप्रकोपवतस्तान्बाणादीन्अनिलः साग्नीनेधानिवेंधनानीव काष्ठंदार्विंधनंत्वेधइत्यमरः आशुदीपयितासद्यःप्रज्वलयिष्यति दीपेर्ण्यंताल्लुट् अंतर्वैराःसंहिताःअपिसतिरंध्रेसद्योविश्लिष्यंतीतिभावः ९९

तइति अतोयंदुर्जयइतिभावः एतेनचिरस्यमित्रव्यसनीसुदमोदमघोषजइतिनिरस्तं १६ अथास्यसर्वराजसमष्टितामेवद्वाभ्यामा चष्टे संपादितेति संपादितंफलंलाभः शरायंनयस्यसः फलंलाभशरायमयोरितिविश्वः सपक्षःससुहृत्कंकादिपत्रयुक्तश्चपरेषांभेदनः

संपादितफलस्तेनसपक्षःपरभेदकः कार्मुकेणेवगुणिनाबाणःसंधानमेष्यति १७

शत्रुविदारणःबाणोबाणासुरःशरश्चगुणिनाशौर्यादिगुणवताअधिज्येनचतेनचैवेन कर्मणेप्रभवतीतिकार्मुकं कर्मणउकञ् तेनैवसंधानंसंधिमेष्यति अतोनैका[illegible] [illegible] १७ ७ ७

ततःकिमतआह मखेति इत्थमनेनप्रकारेणइदमस्थमुरितिथमुप्रत्ययः मखस्यविघ्नायविघातायसकलकंराजकंराजसमूहं गोत्रोक्षो
ष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्इतिवुञ्प्रत्ययः उत्थाप्यक्षोभयित्वाहंतअजातारेरजातशत्रोःयुधिष्ठिरस्यत्वयाप्रथमेना
रिणाजातंअजनि नपुंसकेभावेक्तः१०२ अस्तुसोपिशत्रुःकोदोषस्तत्राह संभाव्येति बंधुरेवबांधवः सधर्मराजःअतिभरस्यक्षमःस्कं

मखविघ्नायसकलमित्थमुत्थाप्यराजकं हंतजातमजातारेःप्रथमेनत्वयारिणा १०२

युग्मं संभाव्यत्वामतिभरक्षमस्कंधंसबांधवः सहायमध्वरधुरांधर्मराजोविवक्षते १०३

धोयस्यसः तंसमानस्कंधमित्यर्थः त्वांसहायंसंभाव्याभिसंधायअभिप्राप्येतियावत् अध्वरधुरां ऋक्पूरब्धूरित्यादिनासमासांतोऽप्रत्य
यः समासांतानांप्रकृतिलिंगत्वात्पुरुषेपरवल्लिंगत्वेटाप् वोढुमिच्छति वहतेःस्वरितेतःसनंताल्लट् तथापिविरोधेविश्वासघातोबंधुद्रोह
श्चेतिस्यातामितिभावः विशेषणसाम्यादप्रस्तुतयुगंधरप्रतीतेःसमासोक्तिरलंकारः १०३

36

ततः किमत आह बृहदिति बृहत्सहायो महासहायवान् क्षोदीयान् क्षुद्रतरोपि स्थूलदूरेत्यादिना यणादिपरलोपः पूर्वगुणश्च कार्यस्यांतं पारं गच्छति तथाहि अपां समूहः आपं तस्य समूह इत्यण् तेन गच्छतीत्यापगा नगस्यापगा गिरिनदी महानद्या गंगादिकया संभूय मिलित्वा अंभोधिमभ्येति क्षुद्रोप्येवं तादृङ्महावीरश्चेद्यस्य किमु वक्तव्यं इत्यपिशब्दार्थः विशेषेण सामान्यसमर्थनरूपोर्थांतरन्यासः १०० नच

बृहत्सहायः कार्यांतं क्षोदीयानपि गच्छति संभूयांभोधिमभ्येति महानद्या नगापगा १००
तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः अभियुक्तं त्वयैनं ते गंतारस्त्वामतः परे १०१

केवलं शत्रोरसाध्यत्वं मित्रविरोधश्चापि अधिकोऽनर्थकर इत्याह तस्येत्यादिना द्वयेन ये च तस्यैव चैद्यस्य मित्राणि नृपाः ये च नैव नामित्राः नृपास्ते उभे त्वया अभियुक्तमभियातमेनं चैद्यं गंतारो गमिष्यंति गमेः कर्तरि लिट् अतः परं उक्तोभयव्यतिरिक्तास्तव मित्राणि तस्यामित्राश्चेत्यर्थः त्वां गंतारः १०१

रः शनैःशत्रुर्दंडेनापिवशगोभवति मित्रंतुवैमनस्येनसाम्नापीत्यर्थः १०५ ननुसुहृत्कार्यात्सुरकार्यंबलीयइत्यत्राह मन्यस
इति नाकिनांदेवानांप्रीतयेऽरिवधःश्रेयान्प्रशस्यतरः प्रशस्यस्यश्रइतिश्रादेशः इतिमन्यसे तर्हिपुरोडाशभुजांहविर्भोजिनांअतएव
नाकिनांइष्टमीप्सितंकर्तुंइषेःकर्मणिक्तः इष्टमिष्टिर्यागइतियावत् यजेर्भावेक्तः वचिस्वपीत्यादिनासंप्रसारणं अलंतरांअतिपर्याप्तंअ
व्ययादाम्प्रत्ययः शत्रुवधादपि प्रियकरोयागइतिनाकिनांभुक्त्वापिशत्रुवधस्यसुकरत्वादितिभावः १०६ तथाप्यमृताशिनांतेषांकि

मन्यसेरिवधःश्रेयान्प्रीतयेनाकिनामिति पुरोडाशभुजामिष्टमिष्टंकर्तुमलंतरां १०६
अमृतंनामयत्संतोमंत्रजिह्वेषुजुह्वति शोभैवमंदरःक्षुब्धक्षुभितांभोधिवर्णना १०७

37 मेभिःपिष्टभक्षणैःप्रलोभनैरतआह अमृतमिति अमृतंनामयत्संतोविद्वांसःमंत्राएवजिह्वायेषांतेषुमंत्रजिह्वेषुअग्निषु मंत्रजि
ह्वःसप्तजिह्वःसुजिह्वोहव्यवाहनइतिवैजयंती यत्पुरोडाशादिकंजुह्वति नदेवेतिशेषः यत्तदोर्नित्यसंबंधात्मंदरएवक्षुब्धोमंथनदं
डः क्षुब्धस्वांतेत्यादिनातस्मिन्नर्थेनिपातनात्सिद्धं तेनक्षुभितस्यमथितस्यअंभोधेर्वर्णनाशोभैवालंकारएवअब्धिमंथनेनामृतमु २७

ननुप्रतिश्रुत्याकरणेदोषःप्रागेवपरिहारःकोदोषस्तत्राह महात्मानइति महात्मानोभजमानाञ्शरणागतान्रिपूनप्यनुगृह्णंतिकिमु तवंधूनितिभावः अत्रार्थांतरंन्यस्यति सिंधवोमहानद्यःसमानःएकःपतिःयासांताःसपत्नीः नित्यंसपत्न्यादिष्विति ङीप्नकारश्चनगनिम्नगाःगिरिनिर्झरिणीःअब्धिंप्रापयंति स्वसौभाग्यंताभ्यःप्रयच्छंतीत्यर्थः अतःपरिहारोप्यनर्हइतिभावः १०४ नहिसंप्रतिउपेक्ष्यापिपश्चात्प्रार्थनयायार्थमावर्जयामीत्याह चिरादिति बलिनःप्रबलस्यअरिषुविषयेबलात्कारोदंडश्चिरात्चिरकालेनापिसद्योमाभू

महात्मानोनुगृह्णंतिभजमानान्रिपूनपि सपत्नीःप्रापयंत्यब्धिंसिंधवोनगनिम्नगाः १०४

चिरादपिबलात्कारोबलिनःसिद्धयेरिषु छंदानुवृत्तिदुःसाध्याःसुहृदोविमनीकृताः १०५

तुइतिभावः सिद्धयेवशात्वसिद्धयेभवतीतिशेषः अविमनसोविमनसःसंपाद्यमानाःकृताःविमनीकृताःवैमनस्यंप्रापिताइत्यर्थः अरुर्मनश्चक्षुश्चेतोरहोरजसांलोपश्चेतिच्विप्रत्ययेसलोपः अस्यच्वावितीकारः शोभनंहृदयंयेषांतेसुहृदःमित्राणि सुहृद्दुर्हृदौमित्रामित्रयोरितिनिपातः छंदस्याभिप्रायस्यानुवृत्यापिचित्तानुरोधेनापिदुःसाध्याःआवर्जयितुमशक्याइत्यर्थः अभिप्रायश्छंदआशयइत्यम

सत्यमस्तिप्रतिश्रुतंकिंत्वस्योन्मत्तत्वादौद्धत्यात्तदपिजिहासितमेवेत्यतआह तीक्ष्णेति सतःपुरुषस्यबुद्धिस्तीक्ष्णानिशिताभ्यादि तिविध्धीत्यध्याहारः एवमुत्तरत्रापितथाप्यरुंतुदतीत्यरुंतुदाशस्त्रवन्मर्मछेदिनीनभवेत् अतोहिंसयैवपरंनपीडयेदित्यर्थः कर्मव्यापारःप्रतापवत्तेजस्विभयदंस्यात्तथापिशांतंस्यात् नतुहिंस्रादिवद्विस्रंभवेदित्यर्थः मनश्चित्तंसोष्म अभिमानोष्णंस्यात्

तीक्ष्णानारुंतुदाबुद्धिःकर्मशांतंप्रतापवत् नोपतापिमनःसोष्मवागेकावाग्मिनःसतः १०१

38

तथाप्युपतापयतिइत्युपतापि अग्न्यादिवत्परसंतापिनस्यात् वाग्मिनोवक्तुःसतोवागेकाएकरूपास्यात् वाग्मीसत्यमेववदेदि त्यर्थः अतःसत्यसंधेस्यप्रतिश्रुतार्थहानिरनर्हेतिभावः अत्रप्रकृतायाःवाचोऽप्रकृतानांबुद्धिकर्ममनसांचतुल्यधर्मादौपम्योपग माद्दीपकालंकारः प्रकृताप्रकृतानांचसाम्यंचेत्तुल्यधर्मतः औपम्यंगम्यतेयत्रदीपकंतन्निगद्यतइतिलक्षणात् बुद्ध्यादीनांशास्त्रा दिव्यतिरेकश्चव्यज्यते १०१ ३८

त्वादिनमितियत् कीर्तिमात्रं अतो हुतमेवामृतमितिवाक्यार्थयोर्हेतुमद्भावाद्वाक्यार्थहेतुकंकाव्यलिंगनलंकारः १०७ यात्रायाः कश्चित्प्रतिबंधोपि दुस्तरस्तवास्तीत्याह सहिष्यइति प्रतीक्ष्यायेपूज्यायैपूज्यःप्रतीक्ष्यः सांशयिकइत्यमरः पितृष्वस्रेपितृभगिन्यै

सहिष्येज्ञातमागांसिसूनोस्तइतियत्त्वया प्रतीक्ष्यंतत्प्रतीक्ष्यायैपितृष्वस्रेप्रतिश्रुतं १०८

विभाषास्वसृपत्योरितिविकल्पादलुगभावः मातृपितृभ्यांस्वसेतिषत्वं तेनवसूनोःज्ञातमागांस्यपराधान् आगोपराधोमंतुश्चेत्य मरः सहिष्येसोढाहेइतित्वयायत्प्रतिश्रुतंप्रतिज्ञानंतत्प्रतीक्ष्यं प्रतिपालनीयं अन्यथामहादोषस्मरणादितिभावः १०८

अवश्यकं चैनदित्याह अनुत्सूत्रेति उत्सूत्र उच्छास्त्रो नीतिशास्त्रविरुद्धः पदन्यास एकपदप्रक्षेपः स्वल्पव्यवहारो पीतियावत् सनास्ति यस्यां सा अनुत्सूत्रपदंन्यासा नीतिपूर्वकसर्वव्यवहारेत्यर्थः अन्यत्र अनुत्सूत्रपदो नाम अनुत्सृष्टसूत्राक्षरः इत्युपसंख्यानेनैरपेक्षाणसूत्राक्षरैरेव सर्वार्थप्रतिपादको न्यासो वृत्तिर्व्याख्यानग्रंथविशेषो यस्यास्तान थोक्ता सन्नीयथार्थकल्पनया शोभना वृत्तिर्भृत्या मात्यादीनांजीविका यस्यां सा सद्वृत्तिः अन्यत्र सती वृत्तिः काशिकाख्ये सूत्रव्याख्यानग्रंथविशेषो यस्यां सा वृत्तिर्ग्रंथजीवनयोरिति वैजयंती सं

अनुत्सूत्रपदंन्यासा सद्वृत्तिः संन्निबंधना शब्दविद्येव नो भाति राजनीतिरपस्पशा ११२

निनिबंधनान्युपजीव्यादीनां क्रियावसानेषु दत्तानि गोणीपणादिशाश्वतिकपारितोषिकदानानि यस्यां सा एतच्च दत्वा भूमिनिबंधनं चेत्येतद्वचनव्याख्याने मिताक्षरायां द्रष्टव्यं अन्यत्र संन्निबंधनं भाष्यग्रंथो यस्यां सा एवंभूतापि राज्यनीतिः राजवृत्तिः अपगतः स्पशो हारो यस्याः सा अपस्पशा चेत् यथार्थवर्णो मंत्रज्ञः स्पशो हारक उच्यत इति हलायुधः अविद्यमानः स्पशः शास्त्रारंभसमर्थक उपोद्घातग्रंथसंदर्भो यस्याः सा अपस्पशा शब्दविद्या व्याकरणविद्येव सा नो भाति न शोभते तस्माच्चारप्रेषणमावश्यकं नद्वहित ३९

अशक्यश्चाकालेन्वैधवधइत्याह स्वयमिति किंचअन्होभानुमानिव स्वयंकृतःप्रसादोनुमहःप्रकाशश्च यस्यतस्यत्वैंधस्य अंतायसमयावधिंनियतकालावसानमप्राप्य भवानपिनालंनशक्तः तथाचद्वथाश्रमापकीर्तिभ्यां अन्यत् न किंचित्फलमिति भावः ११० तर्हि किमत्यंतोपेक्षैवनेत्याह कृत्वेति किंतुकृत्यविदः कार्यज्ञाः विधिज्ञाश्च प्रणिधीयतइतिप्रणिधयो गूढचारिणः प्रणिधिर्गूढपुरुष इतिहलायुधः तरंत्येभिरितितीर्थानिमंत्राद्यष्टादशस्थानानिजलावतारश्च योनौजलावतारेचमंत्राद्यष्टादशस्वपि पुण्यक्षेत्रेतथापा

स्वयंकृतप्रसादस्यतस्यान्हो भानुमानिव समयावधिमप्राप्यनांतायालंभवानपि ११०
कृत्वाकृत्यविदस्तीर्थेषंतःप्रणिधयःपदं विदांकुर्वंतुमहतस्तलंविद्विषदंभसः १११

त्रेतीर्थंस्यादितिहलायुधः तेषंतःपदंस्थानंपादपक्षेपंचकृत्वा महतोदुरवगाहस्यपूज्यस्यच विद्विषन् शत्रुरेवांभः तस्यतलंस्वरूपप्रमाणमितियावत् अधःस्वरूपयोरस्त्रीतलमित्यमरः विदांकुर्वंतुविदंतु विदज्ञानेलोट् विदांकुर्वंत्वित्यन्यतरस्यामितिविकल्पादाम्प्रत्ययांतोनिपातः अं[illegible] श्लिष्टपरंपरितरूपकालंकारः १११

उपयिवांसाति किंच उपायज्ञैः कार्यसाधनकुशलैः तवचरंतीतिचरैः गूढचारिभिः पचाद्यच् एकार्थानित्वयासंहैकप्रयोजनानिराजन्या नांसमूहाराजन्यकानिगोत्रोक्षे त्यादिनावुञ् अजातशत्रोरिमामाजातशात्रवींपुरीमिंद्रप्रस्थंउपेयिवांसिप्रानुवंति उपेयिवाननाश्वा

उपेयिवांसिकर्तारःपुरीमाजातशात्रवीं राजन्यकान्युपायज्ञैरेकार्थानिचरैस्तव ११४

40

ननूचानश्चेतिक्वसुप्रत्ययांतोनिपातः कर्तारःकरिष्यंते कृयःकर्मणिलुट् इंद्रप्रस्थेअस्माकंमहद्राज्यकार्यंभविष्यति तदध्वरयात्राव्याजेनसंनद्धैरागंतव्यंइतिगूढंसंदिश्यतत्रसर्वैमेलइतव्याइत्यर्थः ११५ ৩ ৩ ৩ ४०

स्यराज्ञांधप्रायत्वादितिभावः अत्रापश्यशेतिजतुकाष्टवच्छब्दयोरेवश्लिष्टत्वाच्छब्दश्लेषः सद्भिनिःसन्निबंधनेत्यत्रैकनालाविलं बिफलहयवदर्थयोरेवश्लिष्टत्वादर्थश्लेषः अनुत्सूत्रपदन्यासेत्यत्रतुउभयसंभवादर्थश्लेषःशब्दविद्येवेतिपूर्णोपमाव्यक्तेवतयोः सापेक्षत्वात्संकरः ११२ नकेवलंचारमुखेनपरवृत्तांतज्ञानमपितूपजापश्चकर्तव्यइत्याह अज्ञातेनेति किंचअज्ञातदोषैःपरैरज्ञातमर्मभिःदोषज्ञैःस्वयंपरमर्मज्ञैरभिव्यक्तानिभेद्यस्याग्रेप्रकटितानिशासनानितद्मात्याद्यविश्वासकराणिकपटलिखितानियेषां

अज्ञातदोषैर्दोषज्ञैरुदूष्योभयवेतनैः भेद्याःशत्रोरभिव्यक्तशासनैःसामवायिकाः ११३

नैरुभयवेतनैरुभयत्रभेद्येस्वामिनिचवेतनंवृत्तिर्येषांतैःउभयत्रजीविकाग्राहिभिर्भेद्यनगरवास्तव्यैश्चरैरित्यर्थः भृतयोभर्मवेतनमित्यमरः शत्रोःसंबंधिनःसमवायान्समवयंतीतिसामवायिकाःसंगमुख्याःसचिवादयः समवायान्समवैतीतिठक् उदूष्यद्विषामेतेदत्तहस्ताःअस्माभिरपिएषांलिखितान्येतानिगृहीतानीत्यंवंदूषयित्वा भेद्याःविघटनीयाः ११३ ७ ७

अथफलितंनिगमयन्नाशिषंप्रयुंक्ते सहजेति सहजंस्वाभाविकंचापलंदुर्विनीतत्वंअनवास्थितत्वंच चपलःपारदेशीघ्रेदुर्विनीतेनव
स्थितइतिवैजयंती तेनैवदोषेणसमुद्धतः दृप्तःपक्षःसहायोगरुच्चपक्षःपार्श्वगरुत्साध्यसहायबलभित्तिष्विति वैजयंती चलितः

सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षपरिग्रहः तवदुरासदवीर्यविभावसोशलभतांलभतामसुहृद्गणः ११७

41

अस्थिरः दुर्बलपक्षपरिग्रहोयस्यस असुहृद्गणः शत्रुवर्गः तवदुरासदेवीर्यविभावसौदुःसहतेजोवन्हौ वीर्यंशुक्रेप्रभावेचतेजः
सामर्थ्ययोरपि सूर्यवन्हीविभावसूइतिविश्वामरौ शलभतांपतंगत्वं समौपतंगशलभावित्यमरः लभतांगच्छतु रूपकालंकारः द्रुतविलं ४१
बितंवृत्तं ११७

ननु तत्राध्वरकर्मणि कोयुद्धावकाशः इत्याशंक्य तत्रैव भहत्कलहबीजं संपादयति सविशेषमिति पंडोः सुते युधिष्ठिरे भवति पूज्येत्यपि स विशेषं यथा तथा भक्तिं वितन्वति सति तरलाश्चपलाः मत्सरिणो द्वेषवंतः परे शत्रवः स्वयमेव वैरायितारः वैरं कर्तारः शब्दवैरकलहाभ्रकण्वमेघेभ्यः करण इति क्यङ् ततः कर्तरि लुट् ११५ किं न सर्वे वैरायिष्यंते नेत्याह य इति इह विपक्षमध्ये शत्रुमध्ये सहसंवृद्धियु

सविशेषं सुते पंडोर्भक्तिं भवति तन्वति वैरायितारस्तरलाः स्वयं मत्सरिणः परे ११५ य इ
हात्मविदो विपक्षमध्ये सहसंवृद्धियुजोपि भूभुजः स्युः बलिपुष्टकुलादिवान्यपुष्टैः पृथगस्मा
दचिरेण भावितातैः ११६

जोपि चैद्येन सहैश्वर्यं गता अपि मत्समृद्धिपेत्यादिना क्षिप् ये भूभुजो राजानः आत्मविदः स्वाभिजनवेदिनः स्युः ते भूभुग्भिर्बलिपुष्टकुलात्काककुलात् काके तु करटारिष्टबलिपुष्टसकृत्प्रजा इत्यमरः अन्यपुष्टैः परभृतैरिव कोकिलैरिवाचिरेण सद्यः अस्माद्विपक्षमध्यात् अन्यारादित्यन्यशब्दस्य अर्थपरत्वात्पृथगादियोगेपि पंचमी पृथग्भाविताः पृथग्भूतैर्भविष्यते भावे लुट् चिण्वदिति वृद्धिः तेष्वपि केचिदस्माभिः संगच्छंत इत्यर्थः औपच्छंदसिकं वृत्तं ११६

42

इति माघकाव्ये द्वितीयः सर्गः समाप्तः

इतीति सहरिः इतीत्थं विशकलितार्थो विवेचितार्थमनुगतनयमार्गो नीतिमार्गानुसारिणीं दुर्नयनस्यवलमन्नाधुक्तस्येति भावः अर्ग
लांनिवारयित्रीं इतिवैधर्म्येण रूपकालंकारः तद्विष्कंभोर्गलंननेत्यमरः अतएवजनितमुदं हरेःकृतानंदांउच्छ्रितेउन्नतेउरस्थलेनि
यतंनिषण्णयानित्यविश्रांतयाश्रियाश्रुतांनान्येनेति मंत्रगुप्तिः उद्धवस्येमामौद्धवीं एनांपूर्वोक्तांवाचंवचःश्रुतवान् मायायांसदवसत्वइति

इतिविशकलितार्थामौद्धवींवाचमेनामनुगतनयमार्गामर्गलांदुर्नयस्य जनितमुदमुदस्थादु
च्चकैरुच्छ्रितोरःस्थलनियतनिषण्णश्रीश्रुतांश्रुश्रुवान्सः ११८ इतिश्रीमाघकाव्येशिशुपालवधेद्वितीयःसर्गःसमाप्तः॥

क्वसुप्रत्ययः उच्चैरेवोच्चकैरुन्नतःसन् अव्ययसर्वनाम्नामकच्प्राक्टेरित्यकच्प्रत्ययः उदस्थादासनादुत्थितवान् ऊर्ध्वकर्मणीत्य
स्यप्रत्युदाहरणमेतत् रूपकानुप्रासावलंकारौ मालिनीवृत्तं इतिश्रीपदवाक्यप्रमाणपारावारपारीणश्रीमन्महोपाध्यायकोलाच
लमल्लिनाथसूरिविरचितेमाघकाव्यव्याख्यानेसर्वंकषाख्ये द्वितीयःसर्गःसमाप्तिमगमत्॥ ॥ ॥ ॥

विसतरससंदुमिते शाके पुण्याख्यपत्तने यत्ननःपाठशालायामंकितोयंशिलाक्षरैः॥ शुभंभवतु ॥ श्रीरस्तु ॥ श्रीः संवत् १८९१

43

अथमाघकाव्येतृतीयसर्गप्रारंभः

श्रीगणेशायनमः कौबेरेति अथोद्धववाक्यश्रवणानंतरं अपेतः युद्धेऽभिनिवेश आग्रहो यस्यसः शांतक्रोधइत्यर्थः अतएवसौम्यः प्रसन्नः अतएवकौबेर्याः दिशोभागः उत्तरायणमित्यर्थः स्त्रियाः पुंवदित्यादिना पुंवद्भावः तमपास्य अगस्त्यस्यायमागस्त्यः तंमार्गमवतीर्णः दक्षिणायनंगतइत्यर्थः उष्णांशुरिवस्थितः अनेन हरेः क्रोधः कार्यवशात् आकालमंतस्तंभितोनलेकांततोनिवृत्तइतिसूचितं हरिः

कौबेरदिग्भागमपास्यमार्गमागस्त्यमुष्णांशुरिवावतीर्णः अपेतयुद्धाभिनिवेशसौम्यो हरिर्हरिप्रस्थमथप्रतस्थे १

कृष्णः हरिप्रस्थं इंद्रप्रस्थंप्रतस्थे इंद्रोदुश्च्यवनोहरिरितिहलायुधः समवप्रविभ्यःस्थ इत्यात्मनेपदं देशकालाध्वगंतव्याः कर्मसंज्ञास्यकर्मणामित्यध्वगंतव्यकर्मत्वमितिकेचित् वस्तुतस्तु प्रकृते प्रपूर्वकस्था धातोः सकर्मकत्वमंगीकृत्य हरिप्रस्थमित्यत्र कर्तुरीप्सिततमभित्यंनेनैव कर्मत्वं उत्तरदेशसंयोगानुकूलव्यापारस्यैव धात्वर्थत्वेनविवक्षितत्वात् तथाकर्मत्वांगीकारेतुकोशमास्तइत्यत्रेव क्रोशंव्याप-

अथचामरधारणमाह मृणालेति मृणालसूत्रामलंबिसतंतुविशदं इत्युपमाचलत्वं वीजनादितिभावः चामरयोर्द्वयमंतरेणस्थितः द्व यस्यमध्येस्थितइत्यर्थः अंतरांतरेणयुक्तइतिद्वितीया सहरिरभितःपातुकाउभयतःपातिनीसिद्धसिंधुराकाशगंगायस्यमःपर्याभ भ्यांचेतितसिल्प्रत्ययः सर्वोभयार्थवर्तमानाभ्यामिष्यतइत्युभयार्थत्वं सुप्सुपेतिसमासः पातुकेतिलषपतेत्यादिनाउकञ्प्रत्ययः

44 मृणालसूत्रामलमंतरेणस्थितश्चलच्चामरयोर्द्वयंसः भेजेऽभितःपातुकसिद्धसिंधोरभूतपूर्वांश्रियमंबुराशेः ३

तस्यांबुराशेः अभूतपूर्वापूर्वमभूतासुप्सुपेतिसमासः तांश्रियं भेजे तादृशींशोभांभेजे इत्यर्थः अतएवनिदर्शनासाचांबुराशेःसंभा- वनामात्रोक्ता ऽभितःपातुकसिद्धसिंधुसंबंधमूलया संबंधेसंबंधरूपातिशयान्यासंकीर्यतइतिसंक्षेपः ३ २

कामनानुकूलव्यापारवानिति बोधवद्धरिभरच्छत्वव्यापकमित्यनुकूलव्यापारवानितिलभ्यते तथाप्रकृते विवक्षितत्वादितिदिक् उपमालं कारः सर्गेस्मिन्निंद्रोपेंद्रवज्राभिश्रणादुपजातिवृत्तं अनंतरोदीरितलक्ष्मभाजौपादौयदीयावुपजातयस्ता इतिलक्षणात् १ अथास्यप्रस्थान् सत्नाहं वर्णयन्नादौ छत्रधारणमाह जगदिति अर्कोजगत्पूज्यं तं हरिमनग्वजगत्पवित्रैरपिपादैः किरणैश्चरणैश्च जगंति पुनंतीतिजग

जगत्पवित्रैरपितंनपादैःस्प्रष्टुंजगत्पूज्यमयुज्यतार्कः यतोबृहत्पार्वणचंद्रचारुतस्यातपत्रंबिभरांबभूवे २

त्पवित्रास्तैः स्प्रष्टुंनायुज्यतनार्हत युजेर्दैवादिकात्कर्तरिलङ् कुतः यतः तस्यहरेः बृहद्विपुलंपार्वणचंद्रचारुपूर्णेंदुसुंदरं इत्युपमालंका रः आतपात्त्रायतइति आतपत्रंछत्रं सुपीतियोगविभागात्कः बिभरांबभूवेबभ्रे भृञःकर्मणिलिट् भीह्रीभृहुवांश्लुवच्चेतिविकल्पादा म्प्रत्ययः आतपत्रांतर्हितस्यहरेरपिपादैःस्प्रष्टुमशक्यत्वादित्यर्थः जगत्पूज्यस्यहरेःपादेनस्पर्शनिषेधादितिभावः २

नपुंसकमित्यमरः तदेवावचूडामालिका तस्या आकलनामामोचनमवापेवेत्युत्प्रेक्षा यत्रान्यधर्मसंबंधादन्यदेवोपतर्कितं प्रकृतेनाभि वंत्याज्ञास्तासुत्प्रेक्षांप्रचक्षते ५ तमंगदेति तंहरिंमंदरकूटकोटिव्याघट्टनामंदराचलशिखराग्रसंघर्षणंसंवोत्तेजनाशाणोल्लेखनातया बंहीयसाबहुतरेण प्रियस्थिरेत्यादिना बहुलशब्दस्येयसुनिबंहादेशः मणीनांदीप्तिवितानकेनप्रभापटलेनोल्लसंनीदंदीप्यमाने आ

तमंगदेमंदरकूटकोटिव्याघट्टनोत्तेजनयामणीनां बंहीयसादीप्तिवितानकेनचकासयामासतुरुल्लसंती ६

च्छीनद्योर्नुमितिनुमागमः अंगदेकेयूरे केयूरमंगदंतुल्यमित्यमरः चकासयामासतुः शोभायांचक्रतुः अंगदेचधृतवानित्यर्थः चकासे र्ण्यंताल्लिटि आंप्रत्यये ऽस्तेरनुप्रयोगः अत्रांगदयोः प्राग्भावीयांगदभेदेप्यभेदोक्तिमपेक्ष्यतयोर्मंदरकूटकोट्यसंबंधेपिसंबंधोक्त्याद्वयोर तिशयोक्त्योः संकरः ६

अष्टभिः अस्य प्रसाधनं विविधं वर्णयन् आदौ मुकुटधारणमाह चित्रेति अस्य हरेरुपर्यूर्ध्वदेशे मौलिभाजां मुकुटगतानां मणीनां अनणी यसीभिः महतीभिश्चित्राभिरनेकवर्णाभिर्भाभिः कर्तृभिः स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः इत्यमरः सांतपस्संभो भगो इत्या दिना रोर्यकारे परे तस्य हलि सर्वेषामिति लोपः अनेकैर्धातुभिः गैरिकादिभिः छुरितानां रूषितानां अश्मनां मणीनां रश्मयो यस्य यद्वा धा

चित्राभिरस्योपरि मौलिभाजां भाभिर्मणीनामनणीयसीभिः अनेकधातुच्छुरिताश्मरश्मेर्गोवर्द्धनस्याकृतिरन्वकारि ४
तस्योल्लसत्कांचनकुंडलाग्रप्रत्युप्तगारुत्मतरलभासा अवापबाल्योचितनीलकंठपिच्छावचूडाकलनामिवोरः ५

तुभिः छुरिताः अश्मनां रश्मयो यस्य तस्य गोवर्द्धनस्याकृतिरन्वकारि अनुकृता तत्सादृश्यमभाजीत्यर्थः पूर्णोपमेयं ४ कुंडले वर्णयन्नित्याह तस्येति तस्य हरेरुरो वक्ष उल्लसंत्या कांचनकुंडलाग्रयोः प्रत्युप्तानां खचितानां गारुत्मतरलानां मरकतमणीनां भासा दीप्त्या उरसि प्रसरंत्येति भा वः बाल्यं शैशवं ब्राह्मणादित्वात् ष्यञ् प्रत्ययः तत्रोचितमभ्यस्तं यन्नीलकंठपिच्छं मयूरबर्हं अभ्यस्तं प्युचितं न्याय्यमितियादवः पिच्छबर्हे

तेनेति तेन हरिणा दीधितिभिर्दीपिता आशा दिशो येनसः दिगंतविश्रांततेजा इत्यर्थः पयोधेरंभसां सारस्य विकारः सारमयो मणिः समुद्रमंथनोत्थः कौस्तुभाख्य इत्यर्थः दध्रे धृतः धृञ् धारणे कर्मणि लिट् यत्र मणौ बिंबगतः प्रतिबिंबंगतः लोको बाह्यप्रपंचः तदंगं तस्य हरेः शरीरं साक्षात् साक्षाद्भूतः बहिः प्रत्यक्षेण लक्ष्यमाण इत्यर्थः अंतर्वसन् अंतर्गत इवालक्ष्यत यत्र मणौ प्रतिबिंबितो बाह्यलोकस्तदंग एव

तेनांभसां सारमयः पयोधेर्दध्रे मणिर्दीधितिदीपिताशः अंतर्वसन्बिंबगतस्तदंगे साक्षादिवालक्ष्यत यत्र लोकः ९
मुक्तामयं सारसनावलंबि भाति स्म दामाप्रपदीनमस्य अंगुष्ठनिष्ठ्यूतमिवोर्ध्वमुच्चैस्त्रिस्रोतसः संततधारमंभः १०

नैर्मल्यात् बहिः प्रतिफलितः कुक्षिस्थलोक इवालक्ष्यतेत्युत्प्रेक्षा ९ मुक्तेति अस्य मुक्तामयं मुक्ताप्रचुरं तत्प्रकृतवचने मयट् सारसने कटिसूत्रे अवलंबत इति सारसनावलंबि क्लीबे सारसनं दाम पुंस्कट्यां शृंखलं त्रिष्वित्यमरः आप्रपदं प्राप्नोतीति आप्रपदीनं पादाग्रलंबि आप्रपदं प्राप्नोतीति खप्रत्ययः दाम मुक्तासरः अंगुष्ठेन निष्ठ्यूतं विसृष्टमित्यर्थः गौणार्थत्वाद्ग्राम्यत्वं यथाह दंडी निष्ठ्यूतोद्गीर्ण-

निसर्गेति असौ हरिः निसर्गरक्तैः स्वभावलोहितैः किंच वलयं कटकं कटकं वलयो स्त्रियामित्यमरः तयोरवनद्धानां प्रत्युप्तानां ताम्राश्मनां पद्मरागाणां रश्मिभिश्छुरितैः रूषितैः अत एव तत्रापि सुरारेः हिरण्यकशिपोर्वक्षसो विक्षोभेण विदारणेन जातं यदसृक् तेनास्रजा रूषितैः शिक्तैरिवस्थितैरित्युत्प्रेक्षा स्तात्पर्यतात्वकः अर्तिर्क्षीत्यादिना पुगागमः मितांकुरः नखाग्रैर्व्यद्योतत व्यद्योतिष्ट कटकं च धृतवानित्यर्थः ७ उभा

निसर्गरक्तैर्वलयावनद्धताम्राश्मरश्मिच्छुरितैर्नखाग्रैः व्यद्योतताद्यापि सुरारिवक्षोविक्षोभजासृक्स्नपितैरिवासौ ७
उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः पतेतां तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ८

विति तमालवन्नीलं आमुक्ते आसंजिते मुक्तालते मौक्तिकसरो यस्मिन् तदस्य हरेर्वक्षः आकाशगंगायाः पयसः उभौ प्रवाहौ व्योम्नि पृथक्पतेतां यदि प्रवहेतां चेत् संभावनायां लिङ् तेन व्योम्ना उपमीयेत समीक्रियेत नान्योपमानं किंचित् पश्याम इति भावः मुक्ताहारं धृतवानित्यर्थः अत्र व्योम्नि गंगाप्रवाहद्वयासंबंधेपि संभावनया संबंधकथनादतिशयोक्तिः तदेतत्पुष्पं प्रबालोपहितं यदि स्यादित्याद्युदाहृत्यालंकारसर्वस्व

कारः स्पष्टीचकार ८

अभूदित्यनतूयुक्तं कुतः ह्रियस्मात्साप्रसाधनश्रीः अंगांगेवपुषिवमनीतिशेषः किंच अखिललोकस्यकांताप्रिया इतरातु नित्याउरसिव सतीनिशेषः किंच अन्यस्यकांतानभवतीत्यनन्यकांता किंतुतस्यैवेत्यर्थः अत्रहरेः प्रसाधनादमा धारणीशोभासमजायनेतिपारमार्थिकोवाक्यार्थः अत्रलक्ष्मीशब्देनश्लेषमहिम्नावाच्यायाः शोभायाः प्रतीयमानया श्रियादेव्यासहाभेदाध्यवसायादियमन्यैवलक्ष्मीरि

47

कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललनस्यतस्य आनंदिताशेषजनाबभूवसर्वांगसंगिन्यपरैवलक्ष्मीः १२

त्यभेदेभेदरूपातिशयोक्तिः ११ अथैनमेवार्थंभग्यंतरेणाह कपाटेति कपाटवद्विस्तीर्णेमनोरमेचोरःस्थलेस्थिताश्रीरितिललनाकांताय स्यतस्यहरेरानंदिताशेषजनासर्वांगसंगिनी अतएवापरैव असाधारण्येवश्रीदेव्या अन्यैवलक्ष्मीशोभारमाचबभूव सएवालंकारः प्रायेणै कार्थमप्यनेकंश्लोकमुक्तिविशेषबलभाञ्जिरचयंतिकवयः यथाहनैषधे आदावेवनिपीयेत्यादिश्लोकद्वयंतथास्तकेलिलेशेत्यादिश्लोकद्वयंचे त्यादि १२

वांतादिगौणवृत्तिव्यपाश्रयं अतिसुंदरमन्यत्र ग्राम्यकक्षांविगाहत इति ऊर्ध्वंऊर्ध्वप्रवाहंउच्चै रुन्मतं त्रिस्रोतसो मंदाकिन्याः संततधा
रमविच्छिन्नसंपातमंभइवभातिरित्युत्प्रेक्षा १० सइति इंद्रनीलस्यस्थलमिवनीलमूर्तिः श्यामांगः संहितायांगेरीतिरेफलोपः द्रलो
पेपूर्वस्यदीर्घइतिदीर्घः कर्बूरंहरितालमिववपिशंगंवासांयस्यसः पीतांबरइत्यर्थः हरितालंतुकर्बूरमितिवैजयंती सहरिः विसृत्वरै

सइंद्रनीलस्थलनीलमूर्तिरराज कर्बूरपिशंगवासाः विसृत्वरैरंबुरुहांरजोभिर्यमस्वसुश्चित्र इवोदभारः ११
प्रसाधितस्याथमधुद्विषोऽभूदन्यैवलक्ष्मीरितियुक्तमेतत् वपुष्यशेषेऽखिललोककांतासाऽनन्यकांतात्युरसीतरात्तु १२

र्विसृमरैः इण्नशजिसर्त्तिभ्यइतिकरप् अंबुरुहां अंबुजानांक्विप् रजोभिः परागैश्चित्रश्चित्रवर्णोयमस्वसुर्यमुनायाः उदकस्यभारःपूरः
उदभारः सइवरराज मंथौदनेत्यादिनाविकल्पादुदकशब्दस्योदादेशः ११ प्रसाधितस्येति अथप्रसाधितस्यालंकृतस्यमधुद्विषोहरेरन्यै
वासदृशीविभिन्नाच अन्यौविभिन्नासदृशावितिवैजयंती लक्ष्मीः शोभापद्माच शोभासंपत्तिपद्मासुलक्ष्मीः श्रीरितिगम्यतइतिविश्वः

नत्यंतं कृशतरः तनीयान् क्षीणश्च रक्तो हलादेर्लघोरितिरेफादेशः मध्यो नितांतमाक्रांतः पीडित इव ननाम नतः प्रणतश्च अत्र सर्ग०३
मध्यकुचमंडलयोर्विशेषणसाम्यादरिविजिगीषुराजप्रतीतेः समासोक्तिः तथानयोर्वाच्ययोः प्रतीयमानाभेदेनाक्रमणक्रियाकर्मकर्तृभा
वसंभावनयानुप्राणितेयमध्यस्याक्रमणहेतुत्वोत्प्रेक्षेत्यनयोः संकरः उत्प्रेक्षयोस्तु नैरपेक्ष्यात्संसृष्टिरेवेति विवेकः १५ यांयामिति प्रि
यो हरिर्यायामंगनां नित्यवीप्सयोरितिवीप्सायां द्विर्भावः एकपदं चैतत् प्रैक्षत सा सा पूर्ववत् द्विर्भावः कातराक्षी साध्वसाच्चकितलोचना

यांयां प्रियः प्रैक्षत कातराक्षी सासा ह्रियानम्रमुखी बभूव निःशंकमन्याः सममाहितेर्ष्यास्तत्रांतरे जघ्नुरमुं कटाक्षैः १६

सती ह्रियानम्रमुखी बभूव अनेन कार्यद्वारा लज्जासाध्वसभावोदय उक्तः परं तु स्वशब्दोपादानात् नात्यंतं चमत्कारी अन्यासामीर्ष्याभावोद
यमाह अन्या अनवेक्षितांगनाः आहितेर्ष्याः कृताक्षमाः सत्यः परोत्कर्षाक्षमेर्ष्या स्यादिति लक्षणं तत्रांतरे तस्मिन्वीक्षितावसरे अंतरं क्लीब
मध्येवकाशेन्तरादर्थ्येवसरे ऽवधावितिवैजयंती निःशंकं तदवीक्षणादेव वित्रासं समं युगपत् कटाक्षैरमुं हरिं जघ्नुः प्रजह्रुः सरोषमद्राक्षुरित्यर्थः

अथदेवीसहचरस्यैवास्ययात्रेनिसृत्यन्प्रसाधनविधेः फलमाह दैत्येति भूषणतामुपेयुषानतुप्रहारनामितिभावः दैत्याधिपस्यहिरण्यकशिपोः प्राणमुषांप्राणहारिणांवज्रादपिकठोराणामित्यर्थः नखानां क्षतेनव्रणेन प्रकाशोव्यक्तः कार्कश्यमेवगुणोययोस्तौस्तनौस्तनानित्यर्थः जातावेकवचनंप्राप्तेजातिभूयस्त्वात्स्तनादिषुजानेर्द्वित्वात् द्विवचनं यथाहवामनः स्तनादीनांद्वित्वाविष्टाजातिः प्रायेणेति दधानास्तरु

दैत्याधिपप्राणमुषांनखानामुपेयुषाभूषणतांक्षतेन प्रकाशकार्कश्यगुणौदधानास्तनौतरुण्यःपरिवव्रुरेनम् १४
आकर्षतेचोर्ध्वमतिक्रशीयानभ्युन्नतत्वात्कुचमंडलेन ननाममध्योतिगुरुत्वभाजानितांनमाक्रांतद्दयांगनानां १५

ण्योयुवतयः वयसिप्रथमेङ्निङीप् एनंहरिंपरिवव्रुः वेष्टयामासुः अत्रहरिनखानांनरहरिनखभेदेप्यभेदोक्त्यास्तनयोश्चनाहक्काठि न्यासंबंधेपिसंबंधोक्त्याचातिशयोक्तिः तयोःसापेक्षत्वात्संकरः १४ आकर्षतेति अभ्युन्नतत्वाद्धेतोः ऊर्ध्वमाकर्षतेचननंमध्यमुन्नम यनेवस्थितेनेत्युत्प्रेक्षा अतिगुरुत्वमतिशयत्वमतिशयहलंव [illegible] भजतीतितद्भाक् भजोण्विः तेनांगनानांकुचमंडलेनातिक्रशीया

नेति अन्यस्य साधारणः समस्तजनसाधारणो न भवतीत्यनन्यसाधारणः तस्य भावस्तत्तातां दधानः तथापि यो नंदकः स्वतया केवलं गजाश्वादिवत्साधारणत्वेनैव वस्तुत्वेनैव मुरारेर्मुररिपुसंबंधीन किंतु परेषां शत्रूणां अत्यंतमुद्वेजयिता भीषयितासन् अतएव नाम्नापिनं द्रादिवन्नंदयतीतिनंदक इत्यन्वर्थसंज्ञाबलेनापि तदीयत्वेनेति यावत् तस्यैव हरेरेव तदीय एव योनन्यसाधारणत्वात्परोद्वेजकत्वात्तस्यैवनं

नकेवलंयःस्वतयामुरारेरनन्यसाधारणतां दधानः अत्यर्थमुद्वेजयितापरेषांनाम्नापितस्यैवसनंदकोऽभूत् १९

ननीतमन्येननतिंकदाचित्कर्णांतिकंप्रापगुणंक्रियासु विधेयमस्याभवदंतिकस्थं शार्ङ्गं धनुर्मित्रमिवद्रढीयः २०

49

दकोनंदयितात्वेत्यर्थः सनंदकोनंदकाख्यः खड्गोभूत्सन्निहितोभूदित्यर्थः संबंधानुवादेनसन्निधानमेवात्रविधेयंप्रकरणात् अत्रान्यसाधारणत्वपरोद्वेजकत्वपदार्थाभ्यां विशेषणगत्यानंदकस्यतदीयत्वासमर्थनात्पदार्थहेतुकंकाव्यलिंगमलंकारः १९ नेति अन्येनपुरुषांतरेणन तिमाकर्षणंविभेदेनस्वानुकूल्यं [illegible] रंभासोगुणामौर्वी आहताधर्मश्च

अथ पंचभिरस्य दिव्यास्त्रसन्निधानमाह तस्येति अतसीसूनेन क्षुमाकुसुमेन समानभासस्तुल्यकांतेः स्निग्धश्यामस्येत्यर्थः अतसीस्यादुमा क्षुमेत्यमरः तस्य हरेरेकबाहुः भ्राम्यद्वावर्तमानं मयूखावलीनां मंडलं चक्रवालं यस्य तेन चक्रेण सुदर्शनेन स्फुरन्महानावर्तोंऽभसो भ्रमो यस्य सः स्यादावर्तोंऽभसां भ्रम इत्यमरः यमुनाजलानामोघः पूर इव रेजे चकंद धावित्यर्थः १७ विरोधिनामिति विरोधिनां सर्वचारिणां विग्रहभेदे शरी

तस्यातसीसूनसमानभासो भ्राम्यन्मयूखावलिमंडलेन चक्रेण रेजे यमुनाजलौघः स्फुरन्महावर्त इवैकबाहुः १७
विरोधिनां विग्रहभेददक्षा मूर्तेव शक्तिः क्वचिदस्खलंती नित्यं हरेः सन्निहितानिकामं कौमोदकी मोदयति स्म चेतः १८

रविदारणे दक्षा शरीरं वर्ष्म विग्रह इत्यमरः क्वचित् क्वापि अस्खलंती सर्वत्राप्रतिहतशक्तिरित्यर्थः नित्यं संनिहिता अनपायिनी अतएव मूर्ता मूर्तिमती शक्तिः सामर्थ्यमिवस्थिता इत्युत्प्रेक्षा कौमोदकी तस्य हरेः चेतो निकामं मोदयति स्म सदा सन्निधानेनानंदयतीति भावः १८

 रसजेति महान्रथोयस्यसमहारथोरथिकविशेषः महारथस्यलक्षणं आत्मानंसारथिनंचाश्वान्रक्षन्युद्धेनयोनरः समहारथसंज्ञःस्या
 दित्याङुर्नीतिकोविदा इतिरथांगंचक्रमस्यास्तीतिरथांगी हरिरिष्टसिद्धेः संपादकंलक्षण्यत्वात्पुष्यःसर्वार्थसाधकइतिशास्त्राच्चेतिभावः
सर्वासुदिक्ष्वप्रतिषिद्धमार्गअनिषिद्धमार्गमित्यर्थः अधिशानत्राक्केर्निरंकुशत्वात् पुष्योहस्तोमैत्रमथ्याश्विनंचचत्वार्यङ्गुःसर्वदिग्वारकाणीति

रराजसंपादकमिष्टसिद्धेःसर्वासुदिक्ष्वप्रतिषिद्धमार्गं महारथःपुष्यरथंरथांगीक्षिप्रंक्षपानाथइवाधिरूढः २२
 ध्वजाग्रधामाददृशेथशौरेःसंक्रांतमूर्तिर्मणिमेदिनीषु फणावतस्त्रासयितुंरसायास्तलंविविक्षन्निवपन्नगारिः २३

शास्त्रादितिभावः क्षिप्रंक्षिप्रगामिनं अन्यत्रक्षिप्रंक्षिप्रकारिणं क्षिप्रंचाश्विदिनेषुपुष्यमितिशास्त्रात् पुष्यरथंक्रीडारथं असौपुष्यरथश्चक्रिया
नंनसमराययदित्यमरः अधिरूढःसन्पुष्योरथइवनंपुष्यरथमधिरूढःपुष्यनक्षत्रंगतः क्षपानाथश्चंद्रइवरराज २२ ध्वजेति अथरथारोहणा
नंतरं शौरेःकृष्णस्य ध्वजाग्रंधामस्थानंयस्यसः मणिमेदिनीषुकुट्टिमेषुसंक्रांतमूर्तिःप्रतिबिंबितांगःसन्पन्नगारिर्गरुत्मान्फणावतःसर्पान्त्रास

यस्यनद्विधेयंक्रियासुवशंगनंद्रढीयोदृढतरंपीडासहतरभिनियावद् शृंगस्यविकारः शार्ङ्गनामधनुः मित्रमिवास्यहरेरंतिकस्थंसन्निहित मभवत् २० प्रवृद्धेति धियंरातीतिधीरोमनोहरः मंद्रोगंभीरोंबुदस्येवधीरोनादः प्रवृद्धोयस्यसः प्रवृद्धमंद्रांबुदधीरनादइत्युपमा कृष्णा र्णवाणर्वस्तस्याभ्यर्णचरोंतिकचारी उपकंठांतिकाभ्यर्णाभ्यग्रा अप्यभितोव्ययमित्यमरः सचासावेकहंसश्चेतिश्लिष्टपरंपरितरूपकं

प्रवृद्धमंद्रांबुदधीरनादः कृष्णार्णवाभ्यर्णचरैकहंसः मंदानिलापूरकृतंदधानोनिध्वानमश्रूयतपांचजन्यः २१

मंदानिलस्यापूरंआपूरणंतेनकृतंजनितंनिध्वानंदधानः अनाध्मानोपिमंदमारुतप्रवेशादेवध्वनन्निति पाटवातिशयोक्तिः ध्वन्यसंबं- धेपिसंबंधकथनात् पंचजनोनामकश्चिदसुरस्तत्रभवः पांचजन्यः स्वशंखः बहिर्देवपंचजनेभ्यश्चेतिवक्तव्यमितियञ्प्रत्ययः अश्रूय तश्रूयतेस्म पांचजन्योपिसन्निहितोभूदित्यर्थः धीमाः श्रूयंते [illegible] भेदोपचारात् पांचजन्यस्यश्रवणोक्तिः

यतइति जगतांभर्त्ताधारयिताकुक्षिस्थाखिललोकः कर्तृकर्मणोः कृतीतिकर्मणिषष्ठी सहरिर्यतोयेनभूमार्गेणजगाम ततः तस्मिन्भूमार्गेऽ

धः पाताले धरित्र्या धरण्याः धर्त्राधारयित्रापूर्ववत्षष्ठी फणिनाशेषेण महताभरेण समंतात् भुग्नस्यकुब्जीभूतस्यशिरः सहस्रस्यसाहाय्यके सहायकर्मणि योपधाद्गुरूपोत्तमाद्वुञ् व्यग्रास्त्वरमाणाभुजाः यस्मिन्यथातथाप्रसक्तेप्रसृतं भावेक्तिट् हरिस्त्वचालेत्यर्थः अत्रशेषस्य

यतः सभर्त्ताजगतांजगामधर्त्राधरित्र्याः फणिनाततोधः महाभराभुग्नशिरःसहस्रसाहाय्यकव्यग्रभुजंप्रसक्ते २५

अथोच्चकैस्तोरणसंगभंगभयावनम्रीकृतकेतनानि क्रियाफलानीवसुनीतिभाजंसैन्यानिसोमान्वयमन्वयुस्तं २६

51

अथेति अथहरिचलनानंतरंउच्चकैरुन्नतेतोरणेद्वारदारुणीसंगेनभंगः त द्विशिष्टप्रसरणासंबंधेपिसंबंधोक्तेरतिशयोक्तिः २५ अथेति अथहरिचलनानंतरंउच्चकैरुन्नतेतोरणेद्वारदारुणीसंगेनभंगः त स्माद्भयेनावनम्रीकृतानिकेतनानियैस्तानिसैन्यानिसोमस्यान्वयः संतानः तंसोमान्वयंतंहरिंसुनीतिभाजंसुष्ठुनीतिमंतं क्रियाः सामाद्युपाय प्रयोगास्तासांफलानिहिरण्यभूमिपाचादिलाभाइव अन्वयुः अन्वगच्छन् यातेर्लङ् २६

थितुंभीषयितुंरसायाः तलंपातालंविविक्षन् वेष्टुंप्रवेष्टुमिच्छन्निवेत्युत्प्रेक्षा विशतेः सन्नंताल्लट् शत्रादेश्च ददर्शेदृष्टः सोपिसन्निहितोभूदित्यर्थः अथवारसातलान्नागकुलानि जित्वाऽग्रेऽर्ध्वंप्रयास्यन्निवपन्नगारिरितिपाठः २३ यियासत इति यातुमिच्छतो यियासतः यातेः सन्नंताल्लटः शत्रादेशः तस्यहरेः संबंधी महींधरंतीतिमहीध्राः पर्वताः मूलविभुजादित्वात्कप्रत्यय इत्याहवामनः महीध्रादयोमूलविभुजादिदर्शनादिति नं

यियासतस्तस्यमहीध्ररंध्रभिदापटीयान्पटहप्रणादः जलांतराणीवमहाजलौघः शब्दांतराण्यंतरयांचकार २५

घ्रांरंध्राणि बिलानितेषांभिदाभेदनं षिद्भिदादिभ्योङ् भिदायांपटीयान् समर्थतरः पटहप्रणादो निस्साणघोषः महार्णवस्यौघः प्रवाहः अन्यानिजलानि जलांतराणीव सुप्सुपेतिसमासः अन्यान् शब्दान् शब्दांतराणि पूर्ववत्समासः अंतरयांचकार आच्छादयामासेत्यर्थः अंतरशब्दात् तर्धनार्थात्तत्करोतीतिण्यंतात् लिट् अंतरयतेर्[illegible] ...र्थास्त्वंतर्धेहरिसात्याक्सवर्थास्त्वयुभंतरस्थ्येयसुमभयवाच्यमरः २४

माघ०टी० निस्म किंबहुनाउद्धतिमुत्सृज्य नंदर्पंचिनैवाजगाम कुतः यद्यस्मात् गरिम्णो गुरुत्वगुणस्य माहात्म्यस्य च भियस्थिरेत्यादिना गुरोर्गरादेशः सदृ सर्ग०२

१० शमनुरूपं यथा तथा अचेष्टत अचलत व्यवहरच्च गुरुत्वस्यौद्धत्यप्रतिबंधकत्वादिति भावः अत्रानौद्धत्य इत्यादिप्रस्तुतसुवर्णपरागविशेषण साम्यादप्रस्तुतसुजनप्रतीतेः समासोक्तिरलंकारः २८ निरुध्येति तुरगाः यदुभिरारूढैरिति भावः कथंचिदतिप्रयत्नेन निरुध्यमाना बलादाक

निरुध्यमाना यदुभिः कथंचिन्मुहुर्यदुच्चिक्षिपुरग्रपादान् । ध्रुवं गुरून्मार्गरुधः करीन्द्रानुल्लंघ्य गंतुं तुरगास्तदीषुः २९

52

र्षणेन वार्यमाणा अपि यद्यस्मादग्राणि च ते पादाश्च तान् अग्रपादान् हस्ताग्रायहस्तादयो गुणगुणिनोर्भेदाभेदाभ्यामिति वामनसूत्रात् समानाधिकरणसमासः मुहुरुच्चिक्षिपुरुत्क्षिप्तवंतः तत्तस्मान्मार्गं रुधंतीति मार्गरुधः मंदगमनेन मार्गरोधिनः क्विप् गुरून्महतः पूज्यांश्च अलंघ्यानपीति भावः करीन्द्रानुल्लंघ्य गंतुमीषुरिच्छंति स्म ध्रुवमुत्प्रेक्षा गुरवोपि सन्मार्गप्रतिरोधकाः धैरुल्लंघ्यंत इत्यलंकारेण वस्तुध्वनिः २९ १०

श्यामेति श्यामानिचतान्यरुणानिचतैः श्यामारुणैः कृष्णलोहितैः वर्णैर्वर्णेनेतिसमासः वारणदानतोयैर्गजमदोदकैरालोडिताः संमेलि
ताः अतएव शितिकंठपिच्छक्षोदाः मयूरबर्हचूर्णा इव यौतंतइतितथोक्ताः क्विप् उपमालंकारः कांचनस्यकांचनीवाभूस्तस्याःपरागाः पांस
वः आनेमिभ्यआनेमिप्रधिपर्यंतं चक्रधाराप्रधिर्नेमिरित्यमरः आङ्मर्यादाभिविध्योरित्यभिविधावव्ययीभावः मग्नैरथौघैःक्षुण्णैः

श्यामारुणैर्वारणदानतोयैरालोडिताःकांचनभूपरागाः आनेमिमग्नैःशितिकंठपिच्छक्षोदद्युतश्चुक्षुदिरेरथौघैः २७
नलंघयामासमहाजनानांशिरांसिनैवोद्धतिमाजगाम अन्वेष्टताष्टापदभूमिरेणुःपादाहतोयस्सदशांगरिम्णः २८

रपिष्टाइत्यर्थः परागाणांविशिष्टपेषणासंबंधेपिसंबंधोक्तेरतिशयोक्तिः तथाचमहतीगजरथसंपत्तिर्व्यज्यतइत्यलंकारेणवस्तुध्वनिः २७
नेति अष्टसुलोहादिषुपदंप्रतिष्ठास्येतिअष्टापदंसुवर्णं रुक्मंकार्तस्वरंजांबूनदमष्टापदोस्त्रियामितिसुवर्णपर्यायेष्वमरः तस्यभूमिस्त
स्याःरेणुः कांचनभूरजः पादाहतोरथाश्वादिचरणताडितोपिसन्नित्यर्थः महाजनानांबहुजनतानांपूज्यानांच शिरांसिनलंघयामासनाक्रम

इति बहुवारमित्यर्थः बहूल्यार्थात्‌शस्कारकादन्यतरस्यामितिशस्‌प्रत्ययः संस्तुतंपरिचितमपिवस्तुजनोवाइतिशेषः संस्तवःस्यात्परिचयइ
त्यमरः अनल्पा अधिकाप्रीतिःप्रेमकर्तृ नवंनवं आभीक्ष्ण्येननवंकरोति नित्यवीप्सयोरितिनित्यार्थेद्विर्भावः अहोशब्दःपुराणस्यापिनूत
नत्वमित्याश्चर्ये परमप्रेमास्पदंवस्तुनित्यंदृष्टमपिअदृष्टचरमिवप्रतिक्षणंदिदृक्षंतइत्यर्थः भगवानपितथैवेतिसामान्येनविशेषसमर्थन

उपेयुषोवर्त्मनिरंतराभिरसौनिरुच्छ्वासमनीकिनीभिः
रथस्यतस्यांपुरिदत्तचक्षुर्विद्वान्विदांमासशनैर्नयातं ३२

रूपोर्थांतरन्यासः ३१ उपेयुषइति विद्वानभिज्ञः अतएवतस्यांपुरिनगर्यांदत्तचक्षुःनिसृष्टदृष्टिः असौहरिर्निरंतराभिर्निरंध्राभिरनीकिनी
भिः निरुच्छ्वासमतिसंकटंवर्त्मउपेयुषः प्राप्तस्यरथस्यशनैर्यातंसंबाधेनमंदगमनं नविदांमासनविवेद उपविदजागृभ्योन्यतरस्यामितिआम्प्र
त्ययः व्यासंगादसंवेदनंनत्वज्ञानादितिभावः व्यासंगस्यपदार्थत्वात्पदार्थहेतुकंकाव्यलिंगमलंकारः ३२ ५

अवेक्षितानिति आयता आकृष्टा वल्गा मुखरज्जुर्यस्मिन्कर्मणि तद्यथा तथा यत्नेन दुर्वारवेगत्वात् अतिशयत्नेन निरुद्धा वाहा वाजिनो यैस्तैः वाजिवाहार्वगंधर्वहयसैंधवसप्तयः इत्यमरः तुरंगिभिरश्वसादिभिरग्रे पुरोदेशे अवेक्षितानालोकितान् रेणुभिः प्रक्रीडंतीति प्रक्रीडिताः तान् पांसुक्रीडाकरान् पांसुर्ना न द्वयो रजः इत्यमरः कर्तरि क्तः पृथुकान् शिशून् पोतः पाकोऽर्भको डिंभः पृथुकः शावकः

अवेक्षितानायतवल्गमग्रे तुरंगिभिर्यत्ननिरुद्धवाहैः प्रक्रीडितान् रेणुभिरेत्य तूर्णं निन्युर्जनन्यः पृथुकान्पथिभ्यः ३०
दिदृक्षमाणाः प्रतिरथ्यमीयुर्मुरारिमारादनघं जनौघाः अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति ३१

शिशुरित्यमरः जनन्यः तूर्णमेत्य पथिभ्यो निन्युः अपसारयांचक्रुः इति स्वभावोक्तिः ३० दिदृक्षेति अनघं अकल्मषं मुरारिं दिदृक्षमाणाः द्रष्टुमिच्छंतः दृशेः सन्नंतात् लटः शानजादेशः ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदं जनौघाः रथ्यायां रथ्यायां प्रतिरथ्यं यथार्थेऽव्ययीभावः आरात्समीपं आराद्दूरसमीपयोरित्यमरः [illegible] रिति नैकादिदृक्षेत्यत्राह अनेकश

कृतास्पदेति भूमिभृतांराजांगिरीणांच सहस्रैः कृतास्पदा कृताधिष्ठाना आस्पदंप्रतिष्ठायामिति निपातः उदकमस्यास्तीति उदन्वानुदधिः सर्ग२
उदन्वानुदधौचेति निपातनात्साधुः तस्यांभसा परिवीता परिवेष्टिता मूर्तिः स्वरूपं यस्याः सा पृथ्वी पृथुः वोतोगुणवचनादिति ङीष् एवंभूता
या भूः ननिर्विद्यते न खिद्यत इत्यनिर्वित् विदेः सत्तार्थान्निपूर्वात् सत्सूद्विषेत्यादिना क्विप् तेन अनिर्विदा अखिन्नेन अन्यथा शिल्पसौष्ठवासि

S4

कृतास्पदा भूमिभृतां सहस्रैरुदन्वदंभः परिवीतमूर्तिः अनिर्विदायाविदधेविधात्रा पृथ्वी पृथिव्याः प्रतियातनेव ३४
त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपत्प्रसरस्यसीमा अदृश्यतादर्शतलामलेषु छायेवयास्वर्जलधेर्जलेषु ३५

द्धेरितिभावः विधात्रा प्रथत इति पृथिवी भूः पृथेः षिवन् औणादिकः षिद्गौरादिभ्यश्चेति ङीष् तस्याः प्रतियातना प्रतिकृतिर्विदधे विहिता
प्रतियातना प्रतिच्छाया प्रतिकृतिरित्यमरः भुवः प्रतिनिधित्वोत्प्रेक्षया पुरो वैचित्र्यविस्तारादि वस्तु व्यज्यते ३४ त्वष्टुरिति त्वष्टुर्विश्वकर्म
णः सदाभ्यासेन गृहीतो लब्धो यः शिल्पविज्ञानयोर्विद्यायाः संपदः प्रसरः प्रकर्षः तस्य सीमा अवधिः प्रतिबिंबितया वत् याभूरादर्शतलामलेषु १२

अथैएकत्रिंशत्श्लोकेद्वारिकांवर्णयति मध्यइति समुद्रस्यमध्येमध्येसमुद्रं पारेमध्येषष्ठ्यावेतिविकल्पादव्ययीभावः मध्येशब्दस्यतत्स न्नियोगादेकारांतत्वं कांचनवप्रभासाहेमप्राकारप्रभयाककुभोदिशः पिशंगीः पिशंगवर्णाः गौरादित्वात्ङीष् कुर्वतीयापूः जलंसमुद्रादकंभि त्वाउत्थितेतिशेषः तुरगकांतायाः वडवायाः मुखेहव्यंवहतीतिहव्यवाहोऽग्निः कर्मण्यणित्यण्प्रत्ययः तस्यवाडवाग्नेर्ज्वालेवोल्लास उद्ब

मध्येसमुद्रंककुभःपिशंगीर्याकुर्वतीकांचनवप्रभासा
तुरंगकांतामुखहव्यवाहज्वालेवभित्वाजलमुल्ललास ३२

भासे अत्रसमुद्रांतर्लीनायांवडवानलज्वालायांकदाचित्संभाव्यमानस्यमध्योल्लसनस्यपुरीदर्शनाभेदाध्यवसायेनास्याज्वालात्वमुत्प्रेक्ष्यते इवशब्दोयमुत्प्रेक्षाव्यंजकएवनोपमायांइष्टज्वालायाअप्रतिसिद्धत्वेनोपमानत्वायोगात् मन्येशंकेध्रुवं नूनंप्रायइत्येवमादिभिः उत्प्रेक्षा व्यज्यतेशब्दैरिवशब्दोपिनाह [illegible] ३२

न्यहन्यन्वहं अव्ययंविभक्तीत्यादिनायथार्थेव्ययीभावः अनश्चनपुंसकादन्यतरस्यामितिसमासांतः अन्वकारि अनुकृतः तत्साम्यंप्राप्तमित्य
इत्यर्थः मेरूपमानाद्भस्यतत्तुल्यमौन्नत्यंव्यज्यते ३७ वणिक्पथइति यत्रयस्यांपुरिवणिजांपथिवणिक्पथे आपणे अपूगाः पूगाइवसंप
द्यमानानिकृतानिपूगकृतानिपुंजीकृतानिश्रेण्यादयःकृतादिभिरितिसमासः श्रेण्यादिषुच्व्यर्थमितिच्व्यर्थता अलोलद्युतिभांजिस्थिरप्रभा

वणिक्पथेपूगकृतानियत्रभ्रमागतैरंबुभिरंबुराशिः
लोलैरलोलद्युतिभांजिमुष्णन्रत्नानिरत्नाकरतामवाप ३८

वंति रत्नानिलोलैश्चलैः अतएवभ्रमागतैः जलनिर्गममार्गगतैः भ्रमाश्चजलनिर्गमाइत्यमरः अंबुभिर्मुष्णन् अपहरन् अंबुराशिरर्णवः
जलमात्रसारोपीतिभावः रत्नाकरतामवाप ननुप्रागितिभावः अंबुराशेःप्राक्रत्नसंबंधेपि असंबंधोक्तेरतिशयोक्तिः तथापुर्याःसमुद्रातिश
यिनीरत्नसमृद्धिर्वस्तुव्यज्यते इत्यलंकारेणवस्तुध्वनिः ३८ ७ ९ १३

दर्पणएवधपस्वच्छेषु दर्पणेमुकुरादर्शावित्यमरः जलधेर्जलेषु स्वःस्वर्गस्य स्वरव्ययंस्वर्गनाकइत्यमरः छायाप्रतिबिंबमिवादृश्यतेत्युल्लेखा छाय
त्वनातपेकांतौप्रतिबिंबार्कजाययोरितिवैजयंती ३५ रथांगेति अंबुधिः पितेववरायश्रेष्ठायजामात्रेच वरोजामातरिश्रेष्ठेन्यवदितिविश्वः रथां
गभर्त्रेचक्रधरायहरयेअभिनवंयथातथाप्रतिपादितायाः अंकःसमीपउत्संगश्चतज्ञाजः अंकःसमीपउत्संगेचिह्नेस्थानापराधयोरितिके

रथांगभर्त्रेऽभिनवंवरायस्याःपितेवप्रतिपादितायाः प्रेम्णोपकंठंमुहुरंकभाजोरत्नावलीरंबुधिराबबंध ३६
यस्याश्चलद्वारिधिवारिवीचिच्छटोच्छलच्छंखकुलाकुलेन वप्रेणपर्यंतचरोडुचक्रःसुमेरुवप्रोन्यइवमन्यकारि ३७

शावइ यस्याःपुरःउपकंठंअंतिके अत्यंतसंयोगेद्वितीया अन्यत्रकंठे विभक्त्यर्थेव्ययीभावः मुहुःप्रेम्णारत्नावलीराबबंधामुमोच श्लेषानु
प्राणितेयमुपमेतिसंकरः ३६ यस्याइति चलंतीनांवारिधेर्वारिवीचीनांछटासुपरंपरासुउच्चलद्भिःउत्पतद्भिः शंखानांकुलैराकुलेन संकीर्णेन
यस्याःपुरःवप्रेणप्राकारेणपर्यंत [illegible] मंडलं [illegible] कारयोर्वप्रइत्युभयत्रापिसज्जनः अह

कुतूहलेनेति अंबूनिवहतिइति अंबुवाहोमेघः कर्मण्यण् कुतूहलेनेवांतःप्रवेशकौतुकेनेवेतिहेतूत्प्रेक्षा जवाडुपेत्ययस्याःप्राकारभित्यासहसानि षिद्धोनिवारितः अतएवबहिरेवरसन् गर्जन् दुःखाक्रंदश्चेतिश्लेषः अंबुवर्षव्याजेनभृशंअरोदीत् अश्रूणिमुक्तवान् रुदिन् अश्रुविमोचनेलङ् रुदश्चपंचभ्यइतिईडागमः अत्रांबुवर्षव्याजपदेनापह्नवस्योक्तश्लेषोत्प्रेक्षासापेक्षत्वात्संकरः ४१ यदंगेति यस्यांपुरि अंगनानांरूपंसौंदर्यं

कुतूहलेनेवजवादुपेत्यप्राकारभित्त्यासहसानिषिद्धः रसन्नरोदीद्भृशमंबुवर्षव्याजेनयस्याबहिरंबुवाहः ४१
यदंगनारूपसरूपतायाःकंचिद्गुणंभेदकमिच्छतीभिः आराधितोऽद्धामनुरप्सरोभिश्चक्रेप्रजाःस्वाःसनिमेषचिह्नाः ४२

आकारोवा रूपंस्वभावः सौंदर्यमाकारश्लेषयोरपीतिविश्वः तस्यसरूपतायाःसारूप्यात् भेदकंव्यावर्तकं कंचिद्गुणंधर्ममिच्छतीभिरपेक्ष्यमाणा भिः आच्छीनद्योर्नुमितिविकल्पान्नुमभावः अप्सरोभिराराधितःप्रार्थितोमनुः मानुषसृष्टिकर्तास्वाःस्वकीयाःप्रजाःनिमेषःपक्ष्मपातएव चिह्नं व्यावर्तकंतेनसहवर्ततइतिसनिमेषचिह्नाः तेनसहेति तुल्ययोगइतिबहुव्रीहिः चक्रे अद्धातत्त्वमित्युत्प्रेक्षा तत्वेत्वद्धांजसाद्वयोरित्यमरः अत्रत्वाभा १५

अंभइति यत्रपुरि अपांनिधिः समुद्रः अंभश्च्योतंनिक्षरंतीत्यंभश्च्युतोजलस्राविणः अतएवफेनैःपिनद्धभासःपिहितकांतीन् अपिपूर्वान्नि ह्यतेः कर्मणिक्तः वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरित्यपरकारलोपः कोमलान्उत्कृष्टान् रत्नराशीनातपेदानुंशोषणार्थंनिधातुमिवेति फलोत्प्रेक्षा तल्पेषट्टकेषुअधितल्पं तल्पंशय्याट्टदारेषुइत्यमरः विभक्त्यर्थेऽव्ययीभावः तरंगैरेवहस्तैः विस्तारयामास प्रसारितवान् अत्रात पेदानस्यतरंगहस्तसाध्यत्वेनोत्प्रेक्षारूपकयोः संकरः ३९ यच्छालमिति सागरस्यमहोर्मिभिः कर्तृभिः यच्छालंयस्याः प्राकारं प्राकारोवरणः

अंभश्च्युतःकोमलरत्नराशीनपांनिधिःफेनपिनद्धभासः यत्रातपेदातुमिवोपतल्पंविस्तारयामासतरंगहस्तैः ३९

यच्छालमुत्तुंगतयाविजेतुंदूरादुदस्थीयतसागरस्य महोर्मिभिर्व्याहतवांछितार्थैर्व्रीडादिवाभ्याशगतैर्विलिल्ये ४०

शालोवप्रइत्यमरः उत्तुंगतयाउन्नतत्वनगुणेन विजेतुंजेतुमिवेत्यर्थः फलोत्प्रेक्षेयं व्यंजकाप्रयोगात्गम्या दूरात् उदस्थीयतउत्थितं भा वेलुट् अभ्याशगतैः समीपनिकटाभ्याशसन्निकृष्टसनीडवदित्यमरः व्याहतो वांछितार्थःशालविजयरूपोयेषांतैः विजयासंभवरित्यर्थः अत एवव्रीडादिवनिह्नूत्प्रेक्षा ऊर्मिभिर्विलिल्ये विलीनं [illegible] पूर्वान्कशक्रत्पार्थसापेक्षत्वे

नोत्प्रेक्षयोः संकरः ४०

स्त्रीनिबद्धाभूरित्यमरः   हर्म्यतलेषुउच्चैरुन्नताः प्रणाल्योजलमार्गाः द्वयोःप्रणालीपयसःपद्व्यामित्यमरः अधःपातिनोधस्चराः पयोमुचोमेघाः यस्यांताः अधःस्थतमेघमंडलत्वात् अतीतवृष्टिपाता अपीत्यर्थः विरोधालंकारः पयसांसमूहंपूरमूढ्ऊर्वहंतिस्म चंद्रकांतनिष्यंदैरिति भावः वहेर्लिट् वचिस्वपीत्यादिनासंप्रसारणं अत्रसौधानांप्रणालीनांचताद्दशौन्नत्यंपयःपूरासंबंधेपिसंबंधोक्त्यातिशयोक्तिः ४४ रताविरतोक्रियायत्रनिशम्यदीपानूजालागताभ्योधिगृहंगृहिण्यः बिभ्युर्बिडालेक्षणभीषणाभ्योवैदूर्यकुड्येषुशशिद्युतिभ्यः ४५

57

ति यत्रपुरिगृहेष्वधिगृहं विभक्त्यर्थेव्ययीभावः गृहिण्यःकुलांगनाः अतएवरतौरतिकालेक्रियादीपान्निशम्यनिर्वाप्य शमेर्मिलाद्क्त्वादेशाभावश्चिंत्यः जालागताभ्योगवाक्षमार्गप्रतिष्ठाभ्यः जालंगवाक्षआनायइतिविश्वः विदूरात्प्रभवंतीतिवैदूर्याणि वालवायजमणयः वैदूर्यंवालवायजइत्यमरः विदूराञ्ञ्यंइतिञ्यप्रत्ययः अत्रविदूरशब्दोवालवायस्यादेशः पर्यायोवातत्रोपचरितोवा तेनवालवायात् गिरेरसौप्रभवति नवि १९

दूरान्नगरात्तत्रसुसंक्रियतइति तदुक्तं पालवाप्योविदूरंचमक्तसंतरमेवच नवेतत्रेतिचब्रूयाज्जिल्वरीवदुपाचरदिति तेषांकुड्येषुभित्तिषुसं क्रांताभ्यइतिशेषः अतएवतच्छायापत्यापैंगल्यात्बिडालेक्षणवत्भीषयंतइतिभीषणाभ्योभयंकराभ्यः नंद्यादित्वात्कर्तरिल्युप्रत्यये टाप् शशिसुतिभ्यः बिभ्युःभीताः मौग्ध्यादितिभावः अत्रलज्जावारणायदीपनिर्वापणेनकेवलंतदसिद्धेः प्रत्युतभयंचोत्पन्नमिति

यस्यामतिश्लक्ष्णतयागृहेषुविधातुमालेख्यमशक्नुवंतः चक्रुर्युवानःप्रतिबिंबितांगाःसजीवचित्राइवरत्नभित्तीः

४६

अनर्थोत्पत्तिरूपोविषमप्रभेदः विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्यवाभवेत् विरूपघटनायास्याद्विषमालंकृतिर्मतेतिलक्षणात् ४९ यस्यामिति यस्यांपुरिगृहेष्वतिश्लक्ष्णतयारत्नभित्तीनामतिस्निग्धतयाआलेख्यंचित्रंविधातुंनिर्मातुंअशक्नुवंतोयुवानःप्रतिबिंबितांगाः स्वयंतासुसंक्रातमूर्तयः संतोरत्नभित्तीः सजीवचित्राः सचेतनचित्रवतीश्चित्रकारिवेत्युत्प्रेक्षा ४६ ५०

बृहद्दिति यापूः बृहत्यस्तुला उपरिस्थाप्य दार्वाधारभूता निस्तंभपीठानि येषां तैः तथाप्यतुलैः तद्रहितैरिति विरोधः अनुपमैरिति परिहारः तु
लासाम्ये स्तंभपीठे इत्युभयत्रापि वैजयंती वितानानामुल्लोचानां मालाभिः पिनद्धैराच्छादितैरप्यवितानैः तद्रहितैरिति विरोधः अशून्यैरित्यवि
रोधः समस्तवस्तुसमृद्धैरित्यर्थः अस्त्री वितानमुल्लोचो वितानं त्रिषु तुच्छकमित्युभयत्राप्यमरः विचित्रैरालेख्यरहितैरपि सचित्रैरालेख्यसहितै
रिति विरोधः विचित्रैरद्भुतैरिति परिहारः आश्चर्यालेख्ययोश्चित्रमित्युभयत्राप्यमरः विगताः शालाभद्राणि येषां तानि विशालानि शा

बृहत्तुलैरप्यतुलैर्वितानमालापिनद्धैरपि चावितानैः रेजे विचित्रैरपि या सचित्रैर्गृहैर्विशालैरपि भूरिशालैः ५०

58

ला गृहे नरुस्कंधे शालागारैकदेशयोरिति विश्वः नैर्विशालैरपि भूरिशालैर्बहुभद्रैरिति विरोधः विशालैः पृथुभिरित्यविरोधः विशालं पृथु
लं महदित्यमरः वेः शालच्छंकटचाविति शालच् प्रत्ययः गृहैः रेजे अपि रयं सर्वत्र विरोधे विरुद्धवदाभासाद्विरोधाभासोऽलंकारः विरोधः सोऽ
विरोधेऽपि विरुद्धत्वेन यद्वच इति काव्यप्रकाशे लक्षणात् ५०

दूरान्नगरात्सवसुसंस्क्रियतइति तदुक्तं पालवायोविदूरंचप्रकृत्संतरमेवच नवेतत्रेतिचब्रूयाज्जित्वरीवदुपाचरदिति तेषांकुड्येषुभित्तिषुसं
क्रांताभ्यइतिशेषः अतएवतच्छायापत्यापैंगल्यात्बिडालेक्षणवत्भीषयंतइतिभीषणाभ्योभयंकराभ्यः नंद्यादित्वात्कर्तरिल्युप्रत्यये
टाप् शशियुतिभ्यः बिभ्युःभीताः मौग्ध्यादितिभावः अत्रलज्जावारणायदीपनिर्वापणेनकेवलंतदसिद्धेः प्रत्युतभयंचोत्पन्नमिति

यस्यामतिश्लक्ष्णतयागृहेषुविधातुमालेख्यमशक्नुवंतः चक्रुर्युवानःप्रतिबिंबितांगाःसजीवचित्राइवरत्नभित्तीः ४६

अनर्थोत्पत्तिरूपोविषमप्रभेदः विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्यवाभवेत् विरूपघटनायास्याद्विषमालंकृतिर्मतेतिलक्षणात् ४५ य
स्यामिति यस्यांपुरिगृहेष्वतिश्लक्ष्णतयारत्नभित्तीनामतिस्निग्धतयाआलेख्यंचित्रंविधातुंनिर्मातुंअशक्नुवंतोयुवानःप्रतिबिंबितांगाः
स्वयंतासुसंक्रातमूर्तयः संतोरत्नभित्ती [illegible] ४६ ७

59

बृहदिति यापूः बृहत्यस्तुला उपरिस्थाप्यदार्वाधारभूता निस्तंभपीठानियेषांतैः तथाप्यतुलैः तद्रहितैरिति विरोधः अनुपमैरितिपरिहारः तु
लासाम्येस्तंभपीठेद्रुसुभयत्रापिवैजयंती वितानानामुल्लोचानां मालाभिः पिनद्धैराच्छादितैरप्यवितानैः तद्रहितैरितिविरोधः अशून्यैरित्यवि
रोधः समस्तवस्तुसमृद्धैरित्यर्थः अस्त्री वितानमुल्लोचो वितानंत्रिषुतुच्छकमित्युभयत्राप्यमरः विचित्रैरालेख्यरहितैरपिसचित्रैस्तत्सहितै
रितिविरोधः विचित्रैरद्भुतैरिति परिहारः आश्चर्यालेख्ययोश्चित्रमित्युभयत्राप्यमरः विगताः शालाभद्राणियेषांतानिविशालानि शा

बृहत्तुलैरप्यतुलैर्वितानमालापिनद्धैरपिचावितानैः रेजेविचित्रैरपियासचित्रैर्गृहैर्विशालैरपिभूरिशालैः ५०

लागृहेनरुस्कंधेशालागारैकदेशयोरितिविश्वः तैर्विशालैरपिभूरिशालैर्बहुभद्रैरितिविरोधः विशालैः पृथुभिरित्यविरोधः विशालं पृथु
लं महदित्यमरः वेः शालच्छंकटचावितिशालच्प्रत्ययः गृहैः रेजे अपिरयंसर्वत्रविरोधेविरुद्धवदाभासाद्विरोधाभासालंकारः विरोधः सोऽ
विरोधेपिविरुद्धत्वेनयद्वच इतिकाव्यप्रकाशेलक्षणात् ५० १०

मरकतप्रभायां विलेपनभ्रांत्येतिभावः अतएवभ्रांतिमदलंकारः कविसंमतसादृश्याद्वस्त्वंतरमतिर्यत्रसभ्रांतिमानितिसर्वस्वकारलक्षणा

त् ४८ गोपानसीष्विति यत्रपुरिगृहाणिगोपानसीषुवलभीच्छादनाधारेषुवंशपंजरेष्वित्यर्थः अतएवगोपानसीतुवलभीछादनेवक्रदारु

णि इत्यत्रपटलाधारवंशपंजरइत्याहस्वामी क्षणमीषत्कालं अत्यंतसंयोगेद्वितीया आस्थितानामासीनानां चंद्रकामेचकाः संतियेषामि

ति समौचंद्रकमेचकावित्यमरः तद्वतां चंद्रकिणांमयूराणां आलंबिभिर्लंबमानैः कलापैः बर्हैः कलापोभूषणेबर्हेइत्यमरः हरिन्मणयोमरक

गोपानसीषुक्षणमास्थितानामालंबिभिश्चंद्रकिणांकलापैः हरिन्मणिश्यामतृणाभिरामैर्गृहाणिनीध्रैरिवयत्ररेजुः ४९

तानि गारुत्मतंमरकतमश्मगर्भंहरिन्मणिरित्यमरः तद्वच्छ्यामैस्तृणैरभिरामाणि हरिततृणमयानीत्यर्थः नैनीध्रैः पटलप्रांतैरिवरेजुः

वलीकनीध्रेपटलप्रांतेथपटलंछदिरित्यमरः छादनपर्यायोपटलछदीतदंचलवाचिनीवलीकनीध्रेछदेराधारोवंशपंजरोगोपानसीतिवि

वेकः अत्रहरिततृणालंबनादिगुणक्रियानिमित्तानीध्रैरिवेतिजातिस्वरूपोत्प्रेक्षा ४९

60

क्षितीति यस्यांपुरिवधूजनः क्षितौप्रतिष्ठायस्यसक्षितिप्रतिष्ठोपिचंद्रं दिविस्थितमितिभावः तत्रापिसुखैरेवारविंदैरधश्चकारेतिविरोधः स्वला वण्यमहिम्नातिरश्चकार अधरीचकारेतिपरिहाराद्विरोधालंकारः अतीतानिनक्षत्रपथमितिअतीतनक्षत्रपथानि अत्यादयः क्रांताद्यर्थेद्वि तीययेतिसमासः द्विगुःप्राप्तापन्नेत्यादिनापरवल्लिंगताप्रतिषेधः प्रासादशृंगाणिहृथाऽध्यरुक्षत् अधिरोहतिस्म अनधिरुह्येवाधःकरणा

क्षितिप्रतिष्ठोपिसुखारविंदैर्वधूजनश्चंद्रमधश्चकार अतीतनक्षत्रपथानियत्रप्रासादशृंगाणिहृथाध्यरुक्षत् ५२
रम्याइतिप्राप्तवतीःपताकारागंविविक्ताइनिवर्धयंतीः यस्यामसेवंतनमद्वलीकाःसमंवधूभिर्वलिभीर्युवानः ५३

दितिभावः रोहतेर्लुङ् शलइगुपधादनिटःक्सइतिक्सादेशः अत्राधःकरणवाक्यार्थस्यश्लेषाविरोधात्तमुपजीव्यवैय्यर्थेहेतुत्वात्तत्संकीर्णः काव्यलिंगभेदः ५२ रम्याइति यस्यांपुरियुवानोरम्यारमणीयाइतिहेतोःपताकाःप्राप्तवतीः उत्क्षिप्तध्वजाइत्यर्थः अन्यत्ररम्याइत्येवंपताकाः प्राप्तवतीः प्रसिद्धिंगताइत्यर्थः पताकावैजयंत्यांचसौभाग्येऽर्कध्वजेपिचइतिहेतौप्रकरणेप्रकारादिसमाप्तिष्वित्युभयत्रापिविश्वः विविक्ताः

विकंसयेति यस्यांपुरिनिकेतनानांवेश्मनां वेश्मसद्मनिकेतनमित्यमरः कपोतान्पक्षिणः पालयंतीतिकपोतपाल्योविटंकापरनामानः स्तंभाग्रप्रसारिताः दारुविशेषाः कपोतपालिकायांतुविटंकंपुंनपुंसकमित्यमरः कर्मणि ङीप् तासुकृत्रिमपक्षिणांदारुमयपक्षिणांपंक्तेः कर्मणिषष्ठी विकंसयाक्रमितुमिच्छया जिघृक्षयेत्यर्थः क्रमेः सन्नंताद्प्रत्ययादित्यकारप्रत्ययेटाप् स्नुक्रमोरनात्मनेपदनिमित्त इतीडागमोनभवति अत्रक्रमेर्वृत्त्यादिष्वनिरिक्तार्थेषु अनुपसर्गाद्वेतिवैकल्पिकस्यात्मनेपदनिमित्तस्यानुपसर्गत्वस्यवैवक्षिकस्यसंभवात् आयतमाननं

विकंसयाकृत्रिमपत्रिपंक्तेःकपोतपालीषुनिकेतनानां मार्जारमप्यानतनिश्चलांगंयस्यांजनःकृत्रिममेवमेने ५१

वानिश्चलमंगंयस्यतं मार्जारंबिडालमपि ओतुर्बिडालोमार्जारइत्यमरः जनः कृत्रिमंक्रिययानिर्वृत्तमेवमेने नतुवास्तवमित्यर्थः ड्वितः क्रिः क्त्रेर्मम्नित्यमितिमप्प्रत्ययः अनेनकृत्रिमाकृत्रिमभेदोदुर्ग्रहइतिशिल्पज्ञानातिशयोक्तिः अत्रकविकल्पितसादृश्यान्मार्जारजनयोः कृत्रिमाकृत्रिमेषुविपरीतमतिवर्णनात् भ्रांतिमदलंकारः ५१

१ १

गमः मधूनिमद्यानिकामिनीनांवक्त्राणिच्चपुंसांप्रमदाय प्रीत्यै आमोदकर्मणोवासनाधानस्यव्यतिहारंपरस्परकरणमीयुः अन्योन्यगंधेनान्योन्यवासनामीयुरित्यर्थः द्रुणोलिट् अत्रापिमधूनांवक्त्राणांचप्रकृतत्वात्तत्पूर्वकएवतुल्ययोगिताभेदः तेनयूनांमधुवासितवधूवदनपानंवदनवासितगंडूषमधुपानंचव्यज्यते एतेननिरातंकभोगाःपौराइतिगम्यते ५४ रतांतेति यत्रपुरिगृहांतरेषुवितर्दयोविहारवेदिकाः स्याद्वितर्दिस्तुवेदिकेत्यमरः तासांनिर्व्यूहामत्तवारणाख्याउपाश्रयाः निर्व्यूहोमत्तवारणमितिवैजयंती तेषांविटंकाःउपरितन्यःकपोतपालिकाः तएवनीडानिकु

रतांतरेयत्रगृहांतरेषुवितर्दिनिर्व्यूहविटंकनीडः रुतानिशृण्वन्वयसांगणोंतेवासित्वमापस्फुटमंगनानां ५५

लायानियस्यसः कपोतपालिकायांतुविटंकंपुंनपुंसकमित्यमरः कुलायोनीडमस्त्रियामित्यमरः वयसांशुकसारिकादिपक्षिणांगणः वयःपक्षिणिबाल्यादावितिविश्वः अंगनानां वितर्दिषुरममाणानामितिभावः रतांतरेसुरतमध्येरुतानि रतिकूजितानिशृण्वन् अंतेसमीपेवसतइत्यंतेवासीशिष्यः छात्रांतेवासिनौशिष्याविस्यमरः शयवासवासिष्वकालादित्यलुक् तस्यभावःतत्त्वंआप समीपेप्रतिशब्देनयथाश्रुतमुच्चारणादेवमु १९

विजनाः विमला इति हेतोः रागंवर्धयंतीः विविक्तौ पूतविजना विस्तुभयचाप्यमरः नमद्वल्लीकाः नमन्तीभ्राः वल्लीकनीध्रेपटलइत्यमरः अन्य
त्रनमंत्योवल्यःस्त्रीवल्याख्यामध्यंरखाः यासांताः नमद्वल्लीकाः नद्यृतश्चेतिकप्प्रत्ययः त्रिवलिर्मध्यंरेखाभिर्जीर्णत्वकृगृहदारुश्चितिवैं
जयंती वलभीः कूटागाराणि कूटागारंतुवलभीत्यमरः वधूभिः सममसेवंत वधूसहिताअसेवंतेत्यर्थः अत्रवधूनांवलभीनांचप्रकृतानां
मेवसाधर्म्येणोपमायागम्यत्वात्केवलप्रकृतगोचरातुल्ययोगितानश्लेषः तत्रकेवलप्रभेदेविशेष्यस्यापिश्लिष्टत्वनियमात् यथाहुः प्रकृ-

सुगंधितामप्रतियत्नपूर्वांबिभ्रंतियत्रप्रमदायपुंसां मधूनिवक्त्राणिचकामिनीनामामोदकर्मव्यतिहारमीयुः ५४

ताप्रकृतोभयमुक्तंचेच्छब्दमात्रसाधर्म्यं श्लेषोयंश्लिष्टत्वंसर्वत्राद्येतथानात्सइतिप्रस्तुतानांतथान्येषांकेवलंतुल्यधर्मतः औपम्यंगम्यतेयत्र
सामतातुल्ययोगिता ५३ सुगंधितामिति यत्रपुरिनप्रतियत्नःसंस्कारःपूर्वोयस्यास्तामप्रतियत्नपूर्वामकृत्रिमां स्वाभाविकीमित्यर्थः प्रतियत्न
स्तुसंस्कारइतिवैजयंती शोभनोगंधोयेषांतेषांभावस्तत्तां सुगंधितां सौरभ्यं गंधस्येत्वेतदंतस्य० बिभ्रंति बिभ्राणानि वानपुंसकस्येतिनुमा

 गयामः उत्तरकालश्च येषांते अत्यायतयः आयतिस्तूत्तरेकाले संयमायामयोरपीति विश्वः इयेद्विरूपाः अपि प्रथमचरमतयेत्यादिना जसि
२० विभाषा सर्वनामसंज्ञा विनीतमार्गाः सुविरचिताः पुरवीथयः सुष्ठ्वाचरणपद्धतयश्च अजातं स्खलनं पाषाणादिप्रतिघातो विरुद्धाचरणंच
येषां तैर्जनैर्ज्ञातु कदाचिदपि नामुच्यंत न त्यक्ताः न कदाचित्स्खलीकृता इत्यर्थः अत्र मार्गशब्दस्य साधर्म्यादेकनालावलंबिफलद्वयवदेक
शब्देनार्थद्वयप्रतीतेः द्वयानामपि मार्गाणां प्रकृतत्वाच्च केवलप्रकृतविषयोर्थश्लेषः विशेष्यस्यापि श्लिष्टत्वान्नतुल्ययोगिता ५७ परस्परेति

6.2

परस्परस्पर्धिपरार्घ्यरूपाः पौरस्त्रियो यत्र विधाय वेधाः श्रीनिर्मितिप्राप्तघुणक्षतैकवर्णोपमावाच्यमलं ममार्ज्ज ५८

यत्र पुरि परस्परस्पर्धीन्यहमहमिकयान्योन्यसंघर्षीणि परार्घ्यानि श्रेष्ठानि रूपाणि सौंदर्याणि यासां ताः रूपं स्वभावे सौंदर्ये इति विश्वः पुरे भवाः पौ
र्यस्ताः स्त्रियः स्त्रियाः पुंवदित्यादिना पुंवद्भावः विधाय निर्माय वेधाः स्रष्टा श्रियो लक्ष्मीदेव्या निर्मित्या निर्माणेन यत्प्राप्तं घुणेन वज्रकीटेन क्षत
स्यैकवर्णस्योपमया साम्येन वाच्यमपवादः तदलमत्यंतं तदेवमलमिति कश्चित्तु ममार्ज्ज घुणाक्षरवत्तु यादृच्छिकमिदं श्रीदेवतासौंदर्यशिल्पं न २०

ऽेक्षते अतएवस्फुटमितिव्यंजकप्रयोगः ५५ छन्नेष्विति यत्रपुरिच्छन्नेष्वाच्छादितेषुअपि वादांतेत्यादिनावैकल्पिकोनिपातः स्पष्टतरेषु स्फुटतरंलक्ष्यमाणेष्वित्यर्थः नारीकुचमंडलेषुस्वच्छानिस्फटिकादिवदंतिरोधायकानि अंबराणिवस्त्राणि केवलंनामतोंऽबरमितिनाम्नैवा काशसाम्यंनदधुः अंबरंवाससिव्योम्नीति विश्वः किंतुअर्थतोपि अर्थक्रिययापितत्साम्यंदधुरित्यर्थः स्वयमतिसूक्ष्मत्वादव्यवधायक

छन्नेष्वपिस्पष्टतरेषुयत्रस्वच्छानिनारीकुचमंडलेषु आकाशसाम्यंदधुरंबराणिननामतःकेवलमर्थतोपि ५६
यस्यामजिह्मामहतीमपंकाःसीमानमत्यायतयोऽत्यजंतः जनैरजातस्खलनैर्नजातुद्वयेप्यमुच्यंतविनीतमार्गाः ५७

त्वं दृष्ट्यादेर्मूर्तांतरगत्यविघातकत्वमित्यादिनासाम्यंदधुरित्यर्थः उपमालंकारः ५६ यस्यामिति यस्यांपुरि अजिह्माःअवक्राः अन्यत्राकप- टाः दंभादिरहिताइत्यर्थः आचरेत्सदृशींवृत्तिमजिह्मामशठांतथेतिस्मरणादितिभावः जिह्मंकपटवक्रयोरितिविश्वः महतींसीमानंराज कल्पितक्षेत्रमानमर्यादांकुलगतानुष्ठानस्थितिंचात्यजंतः अपंकाःअकर्दमाः निष्पापाश्च पंकःकर्दमपापयोरितिविश्वः अतिमात्राआयति

धयालिप्तसौधंतद्दलिताभिः स्वभाभिराशाः दिशाउद्भासयन्रेवतीनामनक्षत्रं रेवतीककुद्मिकन्याचजायायस्यसरेवतीजानिः जायायानिङिति
समासांतनिङादेशे लोपोव्योर्वलीतियलोपः रोहिण्याअपत्यंपुमान्रौहिणेयः बलभद्रः स्वांभ्योढक् यांपुरींहातुंत्यक्तुंनइयेषनेच्छतिस्म लिट्
रोहिणीशब्दंद्रश्चहातुंनइयेष अत्ररौहिणेयरोहिणीशयोः पुरउत्कर्षावहत्वेनइयेषुरुत्रक्षिनत्वादिशेष्यस्याश्लिष्टत्वाच्चकेवलत्रकृतविषया
तुल्ययोगिता ६० बाणेति यत्रपुरि बाणाहवेबाणासुरयुद्धेव्याहताक्षयंनीताशंभुशक्तिर्येनतस्यहरविजयिनोजनार्दनस्यकृष्णस्यासत्तिंप्रत्यासत्तिमा

बाणाहवव्याहतशंभुशक्तेरासत्तिमासाद्यजनार्दनस्य शरीरिणाजेत्रशरेणयत्रनिःशंकमूषेमकरध्वजेन ६१

63

सायपुत्रत्वंप्राप्येत्यर्थः शरीरिणा विग्रहवता नत्वनंगेनेतिभावः जेतारएवजैत्राः जयनशीलाः तृजंतात्प्रज्ञादित्वादण्प्रत्ययः तेशराः यस्यतेन
मकरध्वजेनकामेन प्रद्युम्नरूपेणेतिभावः निःशंकंनिर्भीकमूषेउषितं वसनिवासेभावेलिट् वचिस्वपीत्यादिनासंप्रसारणं शंकावितर्कभययोरि
तिविश्वः अत्रशंभुशक्तिव्याघातपदार्थस्यविशेषणगत्यानिःशंकनिवासहेतुत्वोक्त्याकाव्यलिंगभेदः पुराकिलभगवान्भक्तवत्सलोधूर्जटिर्बाण

कौशलमित्ययशाः क्षालितयानित्यर्थः अनयाचातिशयांत्यापौरस्त्रीणांरंभासमानसौंदर्यंव्यज्यते ८८ क्षुण्णमिति यदंतःकरणेनक्षुण्णमभ्यस्तं
ममेदंभूयादिति भूयोभूयः संकल्पितमित्यर्थः कल्पयंतिसंकल्पितार्थानितिकल्पाइत्युपपदंयथावर्णकंयथानेकल्पोपपदाः वृक्षाः कल्पवृक्षाः
तदेवफलंति निष्पादयंति फलनिष्पत्ताविति धातोर्लट् कुतः यांपुरमध्यूषुषोयस्यामुषितवतः उपान्वध्याङ्वसइतिकर्मत्वंभावायांसदनस

क्षुण्णंयदंतःकरणेनवृक्षाःफलंतिकल्पोपपदास्तदेव अध्यूषुषोयामभवज्जनस्ययाःसंपदस्तामनसोप्यभूमिः ८९
कलादधानःसकलाःस्वभाभिरुल्लासयन्सौधसिताभिराशाः यांरेवतीजानिरियेषहातुंनरौहिणेयोनचरोहिणीशः ९०

भुवइतिकसुप्रत्ययः जनस्ययाः संपदोऽभवन् ताः मनसोप्यभूमिः वाचामभूमिरितिकिमुवक्तव्यमितिभावः गृहेगृहेकल्पवृक्षसंबंधातिशयो
त्यापौराणांदेवेंद्रभोगोव्यज्यते इहकल्पइत्युपपदंस्वसंज्ञैकदेशोयेषामितिव्याख्यानेहिरण्यपूर्वंकशिपुमित्यादिवत् नदोषायकाशः ८९
कलाइति सकलाः समग्राः कलाश्चतुःषष्टिविद्याःषोडशभागांश्चदधानः कलाशिल्पेकलाभेदेकलातुषोडशोभागइत्युभयत्राप्यमरः सु-

 स्निग्धेति स्निग्धंयदंजनंतद्वत् तेनचदयामारुचिर्यस्यसः सुवृत्तः सद्वृत्तः सुष्टुवर्तुलश्च त्रयाणांलोकानांसमाहारस्त्रिलोकी तद्धितार्थेत्यादिनास
२२ मासः संख्यापूर्वोद्विगुरितिद्विगुसंज्ञा अकारांतोत्तरपदोद्विगुस्त्रियांभाष्यतइतिस्त्रीत्वं द्विगोरितिङीप् तस्यांतिलकोभूषणभूतः सहरिरेवविशेष
कोवातिलकइवेत्यर्थः इववद्वायथाशब्दाइत्यनुशासनात् तमालपत्रतिलकचित्रकाणिविशेषकाः द्वितीयंचतुरीयंचनस्त्रियामित्यमरः अ

स्निग्धांजनश्यामरुचिःसुवृत्तोवध्वाइवाध्वंसितवर्णकांतेः विशेषकोवाविशिशेषयस्याःश्रियंत्रिलोकीतिलकःस
64 एव ६३ तामीक्षमाणःसपुरंपुरस्तात्प्रापत्प्रतोलीमतुलप्रतापः वज्रप्रभाङ्गास्तिसुरायुधश्रीर्यदिवसेनेवपरैरलंघ्या ६४

सितावर्णानां ब्राह्मणादीनांकांतिः सौजन्यंयस्यास्तस्याः पुरः अध्वंसितावर्णगौरादिः कांतिर्लावण्यंचयस्यास्तस्याः वर्णोद्विजादौशुक्लादावितिभय
त्राप्यमरः वध्वाइवश्रियंविशिशेषविशेषितवान् अनेकेवशब्देयमुपमेत्येकेशब्दमात्रसादृश्यात् श्लेषोपमेत्याहदंडी ६३ तामिति
अतुलप्रतापः सहरिःतांपूर्वोक्तांपुरींईक्षमाणःपुरस्तात्पूर्वस्यांदिशि सप्तम्यर्थेतातिप्रत्ययः प्रतोलींरथ्यां रथ्याप्रतोलीविशिखेत्यमरः प्रापत् प्रा २२

त्रेम्णा बाणाभियोगिनं हरिमभियुज्य निर्जित इति पौराणिकाः कथयंति ६१ निषेव्यमाणेनेति शिवैः मरुद्भिः मंदमारुतैरन्यत्र शिवैरुद्रैर्मरुद्भि
र्मरुद्गणैश्च निषेव्यमाणेन हरिणा श्रीकृष्णेन शक्रेण च चिराय अध्यास्यमाना अधिष्ठीयमाना उद्रश्मिनां रत्नांकुराणां धाम्नि स्थाने एकत्र रत्नांकुरत्व
त्वादन्यत्र रत्नसानुमत्वाच्चेति भावः सिंधो स्थितेनेति शेषः यापूर्वमेरौ स्थिता अमरा अस्यां सन्तीति अमरावतीमिंद्रनगरीं मत्वा बहुत्वानजिरादीना

निषेव्यमाणेन शिवैर्मरुद्भिरध्यास्यमाना हरिणाचिराय
उद्रश्मिरत्नांकुरधाम्नि सिंधावाह्वास्त मेरावमरावतीं या ६२

मिति दीर्घः संज्ञायामिति वत्वं आह्वास्त स्पर्धया आह्वतवती अमरावतीमनुचकारेत्यर्थः ह्वयतेर्लुङ् स्पर्धायामाङ इत्यात्मनेपदं लिपिसिचिह्व
श्च आत्मनेपदेष्वन्यतरस्यामिति च्लेरङ् भावपक्षे सिजादेशः अत्र प्रथमार्थे श्लेषः पिमेरौ स्थितेति बिंबप्रतिबिंबभावेन साधर्म्योक्तेः श्लेषानुप्राणि
तेयमुपमेति संक्षेपः आह्वास्तेति सादृश्यप्रतिपादकशब्दः स्पर्द्धते आह्वयति द्रुह्यति द्वेष्टि इति तु शासनादिति ६२ ६५

निरंतरालइति तमसातिमिरेणेव प्राणभृतांगणेन प्राणिवर्गेणकर्त्रानिरंनरालेपिपूर्वंस्तेनैवातिसंकटेपिपथिसंप्रतिदूरंदूरतएवविमुच्यमा
नेसति एकत्रदीपभयात् अन्यत्रद्विपभयाच्चेत्यर्थः तेजोमहद्भिर्बलाधिकैः प्रभासंपन्नैश्च तेजोबलंप्रभातेजइतिशाश्वतः द्विपेंद्रैर्गार
वासंबाधंअसंकीर्णंअयांबभूवेजग्मे नत्वश्वैरिवक्लृप्तादितिभावः अयगतौभावेलिट् दयायासश्चेत्याम्प्रत्ययः स्वतेजसेवदूरोत्सारिततम

65 निरंतरालेपिविमुच्यमानेदूरंपथिप्राणभृतांगणेन तेजोमहद्भिस्तमसेवदीपैर्द्विपैरसंबाधमयांबभूवे ६७

स्केदीपाइवतथोत्सारितप्राणिकेपथिनिरर्गलंद्विपाः प्रययुरित्यर्थः तमसीतिसप्तम्यंतेपाठेतु तमसः पथ्युपमानत्वेद्विपागमनात् पथइवतम
सोदीपगमनात् आकृतप्राणिवर्गेणनिरंतरालत्वं पश्चान्मुच्यमानत्वंचनसंभवतीत्युपमानोपमेययोर्वैरूप्यंस्यात् तृतीयांतपाठेतमसःप्रा
णिवर्गोपमात्वेनतत्सारूप्यसाकल्यात्सएवसाधीयानित्यालंकारिकाणांपंथाः ६७

मवान् लुङि पूषादित्यादिनाङ्लेरङादेशः वज्राणांतोरणप्रासादाद्यधिगतहीरकादिमणीनांप्रभाभिरुद्भासिनीसुरायुधश्रीरिंद्रचापलक्ष्मीर्यस्यांसा
इह वज्रग्रहणंमणिमात्रोपलक्षणं अन्यथा इंद्रायुधसाम्यासंभवात् अन्यत्रवज्रस्यकुलिशस्यप्रभाभिरुद्भासिनीसुरायुधानाभितरदेवतायुधानां
श्रीः यस्यांसा वज्रोस्त्रीहीरकंपवाविल्यमरः याप्रतोलीदेवसेनेवसुरचमूरिव परैः शत्रुभिरलंघ्या दुर्धर्षा ६४ प्रजाइति अरविंदनाभेर्विष्णो
रंगात्प्रजाइव यतोवाइमानिभूतानिजायंतइतिश्रुतेरितिभावः शंभोर्जटाजूटतटादापइवगंगाजलानीवविधातुर्मुखात्श्रुतयइवसुरजितो ह-

प्रजाइवांगादरविंदनाभेःशंभोर्जटाजूटतटादिवापः मुखादिवाथश्रुतयाविधातुःपुरान्निरीयुर्मधुजिद्ध्वजिन्यः ६५

श्लिष्यद्भिरन्योन्यमुखाग्रसंगस्खलत्खलीनंहरिभिर्विलोलैः परस्परोत्पीडितजानुभागादुःखेननिश्चक्रमुरश्ववाराः ६६

रेः ध्वजिन्यःसेनाःपुरान्निरीयुर्निर्गताः मालोपमेयं ६५ श्लिष्यद्भिरिति अन्योन्येषांमुखाग्रेषुसंगस्तेनस्खलंतःखलीनाःकविकायस्मिन्कर्म
णितद्यथा कविकातुखलीनोस्त्रीत्यमरः श्लिष्यद्भिःसंश्लिष्यद्भिःविलोलैर्मुहुरुच्चलद्भिर्हरिभिस्तुरंगैःकरणैः अश्वान्वारयंतीतिअश्ववाराः
अश्वारोहाःपरस्परेणोत्पीडितजानुभागाःसंतोदुःखेननिश्चक्रमुः निर्जग्मुः इतिस्वभावोक्तिश्लेषोक्त्योः संकरः ६६ ७

हारवत्त्वंनेष्टं तस्यहरिनिष्क्रमणहेतुत्वादित्युभयथाप्युपमित्तभुजवलयगलनहेतुत्वादुपमासंकीर्णयमनिष्टत्वात्संक्षाप्रायेणत्सनेनव्यज्यते
६९ अथसर्गसमाप्तेःसमुद्रंवर्णयति पारइति मुरारिर्नीरनिधेःसमुद्रस्यजलानांपारेपरतीरेपारेजलं पारावारेपरार्वाचितीरेइत्यमरः पारे
मध्येषष्ठ्यावेत्यव्ययीभावः तत्संयोगादेकारांतत्वंचपारेशब्दस्य आसमंतान्नीलाःपलाशानांपत्राणांराशयोयासांताः हरितवर्णपर्णपूर्णा

66 पारेजलंनीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः ७०

इत्यर्थः पत्रंपलाशंछदनमित्यमरः अतएवउत्कलिकाऊर्मयः ऊर्मिरुत्कलिकोल्लोलकल्लोललहरिस्तथेतिहलायुधः तासांसहस्रैःप्रतिक्षण
मुत्कूलिताःकूलमुपहताःकूलंप्रापिताइत्यर्थः उत्कूलशब्दात्तत्करोतिण्यंतात्कर्मणिक्तः तेषांशैवलानांआभेवाआभायासांताः तत्सदृशीरि
त्यर्थः वनावलीरपश्यत् अत्रोत्कलितशैवलत्वस्य [illegible] संकरः ७० ३

शनैरिति रयात्पतंतो धावंतो रथाः सयत्नैः सूतैः सारथिभिः सूतोयंतानसारथिरित्यमरः आयताः आकृष्टाः रश्मयः प्रग्रहाः किरणप्रग्रहौ रश्मीइत्यमरः तैर्भुग्नेषु भंगुरेषु ग्रीवाणां अग्रेषु कंठांतेषु संसक्ताः युगाः स्कंधवाह्याः दारुविशेषायेषांतैः अतएवाखेदैरश्रमैस्तुरंगैर्हस्तिनखात् हस्तिनखः पूर्द्वारिमृत्कूटः कूटंपूर्द्वारियद्धस्तिनखस्तस्मिन्नित्यमरः तस्मात् शनैः क्षितिमनीयंतनीताः इतिस्वभावोक्तिः यथावद्वस्तुवर्णनात् ६८

शनैरनीयंतरयात्पतंतो रथाः क्षितिं हस्तिनखादखेदैः सयत्नसूतायतरश्मिभुग्नग्रीवाग्रसंसक्तयुगैस्तुरंगैः ६८
बलोर्मिभिस्तत्क्षणहीयमानरथ्याभुजायावलयैरिवास्याः प्रायेणनिष्क्रामतिचक्रपाणौनेष्टंपुरोद्वारवतीत्वमासीत् ६९

बलोर्मिभिरिति बलान्यूर्मयइवतैर्बलोर्मिभिः वलयैः कंकणैरिव तत्क्षणेहरिनिष्क्रमणक्षणएव हीयमानापरिमुच्यमाना रथ्या भुजाइवयस्यास्तस्याः अत्राबंतोभुजाशब्दः अतएवास्याः पुरः द्वारवत्याः चक्रपाणौकृष्णेनिष्क्रामतिसतिनिर्गच्छतिसतिप्रायेण भूम्ना द्वारवतीत्वं द्वारकात्वं सत्यरूपमितियावत् नदिष्टंनासीत् हरिविरहेतद्वैफल्यादितिभावः द्वारवतीशब्दस्यसंज्ञात्वात् त्वतलोर्गुणवचनस्येतिपुंवद्भावः अन्यत्रद्वारवतीत्वं

तेनगच्छंतीत्यापगाः तासांपतिंसमुद्रं असौहरिरपस्मारिणं अपस्मारिरोगिणमाशशंके तत्कर्मयोगात्तथोत्प्रेक्षांचक्रे इत्यर्थः यथाहुर्नैदानिकाः
कुर्द्धैर्धातुभिराहतेथमनसिमाणीमनःसंदशन्दंतान्खादतिफेनमुद्गिरनिदोः पादौक्षिपन्मूढधीः पश्यन्रूपमनोक्षितौनिपततिप्रायःकरोति
क्रियाः विभ्यस्ताः स्वयमेवशाम्यतिगतेवेगेत्वपस्माररुक् ७२ पीत्वेति जलानांनिधिनासमुद्रेणगर्द्धएवगार्ध्यं औपम्यादित्वात्चातुर्वर्ण्यादित्वा
त्स्वार्थेष्यञ्प्रत्ययः तदतिमात्रमतिगार्ध्यंतस्मात् तृष्णाभरादित्यर्थः गृधोर्भविष्यत्प्रत्ययेकृतेगुणेगार्धव्यमितिस्यात् पीत्वाक्षेपणक्रियापेक्षया

67

पीत्वाजलानांनिधिनातिगार्ध्याद्वृद्धिंगतेप्यात्मनिनैवमांतीः क्षिप्ताइवेंदोःसरुचोधितीरंमुक्तावलीराकलयांचकार ७३

पूर्वकालता अथवृद्धिंगतेआत्मनिस्वदेहे चंद्रोदयेसमुद्रवृद्धिरित्यागमः नैवमांतीः अतिरिच्यमानाइत्यर्थः मातेःशतरिङीप् आच्छीनद्योर्नुम् क्षि
ताः उद्गीर्णाः अतितृष्णयोत्कंठयापीत्वा अंतरमानात्वहिरुद्भूताइत्यर्थः इंदोःरुचोमरीचयइवेत्युत्प्रेक्षा सहरिरधितीरंअधिवेलं वेलातीरविका
रयोरितिविश्वः मुक्तावलीराकलयांचकार आकलयामास कलतिः कलगतिसंख्यानयोरितिकामधेनुः ७३ ५ २५

लक्ष्मीभृतइति असौहरिः लक्ष्मीं शोभां श्रियं देवीं च बिभ्रतीति लक्ष्मीभृतः तान् अंभोधितटे अधिवासो येषां तान् नीरदवन्नीलभासः नीलवर्णा स्तान् लताः वध्व इवेत्युपमितसमासः अन्यत्र लता इव वध्व इति शाकपार्थिवादित्वान्मध्यमपदलोपी ताभिः संप्रयुज्यंत इति संप्रयुजः संगता न् क्विप् अधिवेलं वेलायां ——— इत्यधिवेलं विभक्त्यर्थेऽव्ययीभावः द्रुमान् बद्धस्तनाननेकीकृतान् स्वान् स्वकीयप्रियहानिवेत्यर्थः एवं

लक्ष्मीभृतोंऽभोधितटाधिवासान्द्रुमानसौ नीरदनीलभासः लतावधूसंप्रयुजोऽधिवेलं बद्धस्तान्स्वानिव पश्यतिस्म ७१
आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरंगं फेनायमानं पतिमापगानामसावपस्मारिणमाशशंके ७२

च पुल्लिंगताया निर्वाहः आत्मपरत्वेन पुंसकत्वापातात् सो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वो स्त्रियां धन इत्यमरः पश्यतिस्म श्लेषसंकीर्णेयमुत्प्रेक्षा ७१ आश्लिष्टेति आश्लिष्टभूमिमालिंगितभूतलं उच्चैः उच्चैस्तरां रसितारं क्रंदितारं लोलतां चलतां इतस्ततः पततां भुजानामाकार इवाकारो येषां ते बृहत्तरंगा यस्य तं तथोक्तं फेनायमानं फेनमुद्वमंतं ...पतिः आपगानां समूहः आपं तस्य समूह इत्यण् मन्ययः

माघ०टी० दिकंभजंतीत्युत्तमलाभभाजस्तान् नत्रत्वंद्वैप्यं अव्ययात्यप् अफल्गुसारवत् फल्गुतुच्छमसारंचेतियादवः भांडंमूलधनंमण्यद्रव्यमित्य सर्ग३
२६ र्थः वणिक्मूलधनेपात्रेभांडंभूषाश्वभूषयोरितिवैजयंती तरीषुनौषु स्त्रियांनौस्तरणिस्तरिरित्यमरः अविरत्नृसृतंत्रीरित्यौणादिक
ईकारप्रत्ययः आवपतः आदधतः तानग्रतः शकुनभूतानवलोक्यतुतोषेत्यर्थः वपतेःशतृप्रत्ययः द्वैप्यान्समुद्रद्वीपवासिनः द्वीपा

68

उत्पित्सवोंतरनंदभर्तुरुच्चैर्गरीयसानिःश्वसितानिलेन पयांसिभक्त्यागरुडध्वजस्यध्वजानियोच्चिक्षिपिरेफणींद्राः ७७

दनुसमुद्रंयञ्जितियञ्प्रत्ययः संयात्रासंभूययात्रासाप्रयोजनमेषांतान् सांयात्रिकान् पोतवणिजः सांयात्रिकःपोतवणिगित्यमरः प्रयोज
नमितिठक् असौहरिरभ्यनंदत् ७६ उत्पित्सवइति नदभर्तुःसमुद्रस्यांतरभ्यंतरात् उत्पित्सवः उत्पतितुमिच्छवः पततेःसनंतादुप्रत्ययः
सनिमीमेत्यादिनाइसादेशः [illegible] जानिवगरीयसाऽतिमहतानिश्वसि २६

साटोपमिति अमी मेघाः साटोपं ससंभ्रमं संभ्रमाटोपसंरंभा इत्यमरः अनिशं नदंतो गर्जंतो येः रंभोभिः उदश्चः समंततः प्लावयिष्यंति तानि अं
भांसि पयोधेः एकदेशात् एककोणान्निभृतं निश्चलं यथा तथा पिबतो मेघान् स हरिर्ददर्श एतेन समुद्रस्यापरिच्छिन्नरूपत्वं व्यज्यते ७४ उद्ध-
त्येति मुनींद्रैस्तत्तोचेदादर्थं वेदार्थमिव मेघैस्तत्तांबुराशेः रेव तोयमुद्धृत्य संप्रणीताः कृताः अंबुराशिं पतंतीः प्रविशतीर्नदीः वेदं स्मृतीर्मन्वा

साटोपमुर्वीमनिशं नदंतो यैः प्लावयिष्यंति समंततोऽमी तान्येकदेशान्निभृतं पयोधेः सोऽम्भांसि मेघान्पिबतो ददर्श ७४
उद्धृत्य मेघैस्तत एव तोयमर्थं मुनींद्रैरिव संप्रणीताः आलोकयामास हरिः पतंतीर्नदीः स्मृतीर्वेदमिवांबुराशिं ७५
विक्रीय दिश्यानि धनान्युरूणि द्वैप्यानसावुत्तमलाभभाजः तरीषु तत्रत्यमफल्गु भांडं सांयात्रिकानावपतोऽभ्यनंदत् ७६

दिसंहिता इव हरिरालोकयामास श्रुतिमूलत्वेन प्रामाण्यात् स्मृतीनां तत्संवाद एव नतत्प्रवेशः अनेकेवोपमा ७५ विक्रीयेति दिक्षु भवानि
दिश्यानि दिगंतरगदानीतानीत्यर्थः दिगादिभ्यो यत् उरूणि महांति धनानि नानाद्रव्याणि विक्रीय मूल्येन दत्वा उत्तमलाभं मूलात् द्वैगुण्या

उत्तालेति चमूषुचरंतीतिचमूचराः सैनिकाः चरेष्ट इतिटप्रत्ययः तैरुत्तालेषुउन्नतेषुतालीवनेषुसंप्रवृत्तेन समीरेण प्रसृतेन मारु तेनसीमंतिताः सीमंतवत्यः कृताः सीमंतशब्दान्मत्वर्थाजंतात्तत्करोतेर्ण्यंतात्कर्मणिक्तः णाविष्ठवद्भावेऽतिनस्यलुक् ताः केतक्योयेषुतेतथोक्ताः नद्यृतश्चेतिकप्प्रत्ययः लवणसिंधोरिमालावणसैंधव्यः तस्येदमित्यण्प्रत्ययः हृद्भगसिंध्वंतेपूर्वपदस्यचेतिउभय

69

उत्तालतालीवनसंप्रवृत्तसमीरसीमंतितकेतकीकाः
आसेदिरेलावणसैंधवीनांचमूचरैः कच्छभुवांप्रदेशाः ८०

पदवृद्धिः तासांकच्छभुवामनूपभूमीनां जलप्रायमनूपंस्यात्पुंसिकच्छस्तथाविधइत्यमरः प्रदेशादेशाआसेदिरेप्राप्ताः सीदतेःकर्मणिलिट् अत्रस्वभावोक्तिरनुप्रासश्चालंकारौ अत्रश्लेषमौशब्द्यसौकुमार्याद्यनेकगुणसंपत्तिःस्पष्टा ८० ७१ २७

तानिलेनपर्यांस्युच्चैरुच्छिक्षिपिरे उत्क्षिप्तवंतः उत्प्रेक्षा स्वरितत्वादात्मनेपदं ७७ तमिति अंबुराशिर्युगांतबंधुमापद्बंधुमित्यर्थः उत्संग एवशय्यातस्यां शेतेइतितंतथोक्तं अधिकरणेशेतेरित्यच्प्रत्ययः आगतमभ्यागतं हरिंवीक्ष्यगुरुणाप्रमोदेनप्रसारिताउत्तुंगास्तरंगा एवबाहवोयस्यसः सन्प्रत्युज्जगामेवेतिक्रियास्वरूपोत्प्रेक्षा ७८ उत्संगितेति उत्संगिनः संसर्पिणः कृताः उत्संगिताः तत्करोतेर्ण्यंना

तमागतंवीक्ष्ययुगांतबंधुमुत्संगशय्याशयमंबुराशिः प्रत्युज्जगामेवगुरुप्रमोदप्रसारितोत्तुंगतरंगबाहुः ७८

उत्संगितांभःकणकोनभस्वानुदन्वतःस्वेदलवान्ममार्ज्ज तस्यानुवेलंव्रजतोधिवेलमेलावनास्फालनलब्धगंधः ७९

न्तः उत्संगिताः अंभःकणाः येन शेषाद्विभाषेतिकप्प्रत्ययः एलावनानामास्फालनेनसंघर्षेणलब्धगंधः एवंशिशिरसुरभिरुदन्वतोन भस्वान्समुद्रवायुः अधिवेलंवेलायांविभक्त्यर्थेव्ययीभावः व्रजतस्तस्यहरेः स्वेदलवान् अनुवेलंप्रतिक्षणं यथार्थेव्ययीभावः ममार्ज्ज जहार वेलाकालेचजलधेर्वेलातीरविकारयोरितिविश्वः काव्यलिंगं ७९

तुरगेति परितः तुरगशतैराकुलस्य अपरिमिताश्वस्येत्यर्थः प्रतिपथं प्रतिमार्गं यथार्थेऽव्ययीभावसमासः प्रमथिताः क्षुण्णाः भूभृतो गिरयश्च येन तस्य न तु केनापि मथितस्येति भावः सततं धृतश्रियः पुरोऽग्रे नगराद्बहिः परिचलतः परिगच्छतः बलो रामस्तदनुज-

तुरगशताकुलस्य परितः परमेकतुरंगजन्मनः प्रमथितभूभृतः प्रतिपथं
मथितस्य भृशं महीभृता परिचलतो बलानुजबलस्य पुरः सततं धृतश्रि
यश्चिरविगतश्रियः सलिलनिधेश्च तदाभवदंतरं महत् ८२ ३

स्य हरेर्बलस्य सैन्यस्य बलं सैन्ये बलो राम इत्युभयत्रापि शाश्वतः अथ परं केवलं एकस्यैव तुरंगस्य जन्म जन्ममात्रं यस्मात्तस्यैकतुरंग
जन्मनः एकोऽपि जातो नत्वस्तीति भावः महीभृता मंदराद्रिणा राज्ञा च भृशं मथितस्य न तु स्वयं कस्यापि मथिता चिरविगतश्रियः उत्सत्यनं २८

लवंगेति लवंगमालाभिः लवंगकुसुमगान्यैः कलिंतावतंसाकृतभूषणाः नालिकेरांतरित्यव्ययंनालिकेराभ्यंतरइत्यर्थः अपइतिष्ट
यकपदंसमासेनकर्पूरित्यादिनासमासांतप्रसंगात् पिबंतःआस्वादिताःभक्षिताः आर्द्रक्रमुकाः आर्द्रपूगीफलानियैस्ते घोंटातुपूगःक्र
मुकइत्यमरः तेनवमूत्वराः समुद्रादभ्यागतस्य अतिथेःप्रतिपत्तिंगौरवंसत्कारमापुः प्रतिपत्तिःपदप्राप्तौप्रवृत्तौगौरवेपिचेतिविश्वः

लवंगमालाकलितावतंसास्तेनालिकेरांतरपःपिबंतः
आस्वादितार्द्रक्रमुकाःसमुद्रादभ्यागतस्यप्रतिपत्तिमापुः ८१

अत्राभ्यागतप्रतिपत्तिप्राप्तेर्विशेषणगत्याऽवतंसकलनादिपदार्थहेतुत्वात्काव्यलिंगमलंकारः तेनसमुद्रमथनमुन्वराणां गृहागताभ्या
गतौपम्यप्रतीतेरलंकारेणालंकारध्वनिः ८१

रचिते माघव्याख्याने सर्वंकषाख्ये तृतीयः सर्गः समाप्तिमगमत् ॥ शुभंभवतु ॥ द्विसप्तसप्तेंदु १७७२ मिते शाके पुण्याख्यपत्तने ॥
यत्नतः पाठशालायामंकितोऽयं शिलाक्षरैः ॥ १ ॥ ॥ ॥

71

तरंगैवास्याद्दरिस्वीकरणादितिभावः जलनिधेश्चतदाप्रस्थानसमयेमहदंतरंदूरगमनादिव्यवधानंउक्तरीत्यामहत्तारतम्यंच भवतु अत्रोपमेयस्यहरिबलस्यउपमानाज्जलधेराधिक्यवर्णनाद्व्यतिरेकालंकारः पंचकावलीवृत्तंनजभजजाजकोहरयतिक

इतिश्रीमाघकाव्येतृतीयःसर्गःसमाप्तः

थिताभुविपंचकावलीतिलक्षणात् चरितेतिकेचित् नजभपुरस्कृताजजरारचिताभुविरुद्रदिक्पतिरितिलक्षणात् धृतश्रीवृत्तं धृतश्रीर्यज्ञाञ्जौचिस्वराद्रितिलक्षणात् ८२ इतिश्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिवि

72

73

इतिश्रीमाघकाव्येतृतीयःसर्गःसमाप्तः ३